प्रस्तावना.

जैनधर्मनां बहु पुस्तको अज्ञानरूप अंधकारनो नाश करनारां छे छतां श्रीविक्रसेन सूरिना शिष्य हरिमुनिये रचेलुं चिंतामणि रत्न तुल्य कर्पूरप्रकर नामनुं पुस्तक पोतानी काव्य चमत्कृतिथी अने रस तथा अलंकारोथी माणसोने अनहद आनंद उपजावे छे. मुनिये चोराशीद्वार देखाडवाना मीषथी जूदां जूदां काव्योवडे एवो सरल उपदेश आपेलो छे के, जेने सांभलवाथी माणसोनां मन सहजमां आनंद पामेछे. मूल ग्रंथ उपर श्री जिनवर्द्धन सूरिनी पाटे थयेला श्री जिनचंद्र सूरिना शिष्य जिनसागर सूरिये सरल संस्कृत टीका रची छे ते एटलाज हेतुथी के, भविष्यनां थनारी प्रजा थोडुं संस्कृत जाणनारी होय तो पण तेनो लाभ लइ शके. परंतु हालमां काल महात्म्यने लीधे संस्कृतनो परिचय ओछो थइ जवाथी आवा रसदायक सरल ग्रंथनो लाभ लेवाने हालनी प्रजा अशक्त थइ पडी छे माटे ए ग्रंथनो हालनी प्रजा पण लाभ लइ शके एवा हेतुथी अमे तेनुं सरल गुजराती भाषांतर करी मूल टीका अने गुजराती भाषांतर सहित ते पुस्तक छपावी बहार पाड्युं छे वली संस्कृत वांचनारोओने सुगमता थवा माटे टीकामां बहु सरल शब्दो वापर्या छे हुं आशा राखुं छुं के, सज्जनो आ ग्रंथनो आदिथी अंत सुधी वांचवानो लाभ लइ महान् पुरुषे करेलो उपकार भूलशे नहीं.

आ ग्रंथनुं गुजराती भाषांतर करती वखते टीकानी त्रण प्रतो एकठी करी हती परंतु ते त्रण केटलेक ठेकाणे अशुद्ध तेमज संबंध विनानी हती; तेने सुधारी लेवामां आवी छे तो पण कोइ ठेकाणे दृष्टिदोषथी अशुद्ध रही गयुं होय तो ते सज्जन पुरुषोए सुधारी लेवुं.

ल. प्रसिद्धकर्ता.

ननिचयः कुसुमसमूहः । पुनः किंभूतः । पुण्यमेव धर्मएवाब्धि
समुद्रस्तस्य फेनोदय इव डिंडीरपिंडोच्छ्राय इव पुण्याब्धिफेनो
दयः ॥ पुनः किंभूतः । मुक्तिरेव श्रीः मुक्तिश्रीः सिद्धिल
स्याः करपीडने विवाहेऽच्छो निर्मळः सिचयइव वस्त्र मिवाच्छसि
यः । पुनः किंविशिष्टः ।वाग् वाणी सैव कामधेनुः कामदुघा तस्याः
पय इव दुग्धमिवपयः ॥ एतावता कर्पूरचंद्रा. पन पुनानिचय.
नोदयाच्छसिचयपयःसमानोज्वलो जिनदंतकांतिसमूहो वो
क्षतु ॥ १ ॥

शांतिरूप अमृतजलने विषे कपूरना समूह समान, अरुप
चंद्रमानी ज्योत्स्ना (चांदणी) समान, केवलज्ञान रूपी वृक्षना पु
ष्पना समूह समान, पुण्यरूप समुद्रना फीणना उदय समान, मुक्ति
रूप श्री (वधु)ना विवाहने विषे निर्मल वस्त्र समान अने वा
कामधेनुना दूध समान एवो जे जिनेश्वर भगवाननो व्याख्यान समये
देखातो मनोहर दांतनी कांतिनो समूह, ते तमारू रक्षण करो. ॥१॥

हवे आ ग्रंथने विषे कहेवानां द्वारनां नामो एक काव्यथी कहेछे

(स्रग्धरावृत्तम्.)

भव्या लब्ध्वार्यदेशं कथमपि नृभवं सत्कुलं साधुसंगं,
बोधं देवादिशक्तीः कुरुत शमयतिश्रावकत्वव्रतानि ॥
सप्तक्षेत्रीजिनार्चानयविनयसुवैराग्यदानादिपुष्टिं,
शब्दद्यूतक्रुधादेर्जयमपि सुकृताहेषु सत्कर्म मुक्त्यै ॥२॥

भव्येति ॥ भो भव्या भाविकाः ! आर्यदेशं पुण्यवन्निगमं १ कथमपि महता कष्टेनापि २ नृभवं मनुष्यजन्म ३ सत्कुलं प्रधान वंशं ४ साधुसंगं सत्पुरुषसंगतिं ५ बोधं उपकारकार्युपदेशवचनं ६ देवादि देवः सर्वज्ञः आदिर्यस्य तत् आदिशब्दात् सम्यक्त्वगुरुधर्माणां त्रयाणां ग्रहणं १० शक्ति शरीरसामर्थ्यं ११ लब्ध्वा प्राप्य॥ किं कुरुतेत्याह ॥ शमं उपशमं १२ यतित्वं साधुत्वं १३ श्रावकत्वं श्राद्धत्वं १५ व्रतानि द्वादशव्रतानि २६ कुरुत विधत्त ॥ पुनः किं कुरुतेत्याह ॥ सप्तक्षेत्रीः जिनभवनाबिंबपुस्तकादिकाः ३३ जिनार्चां देवपूजां ३४ नयं न्यायं ३५ विनयमभ्युत्थानादिकं ३६ सुवैराग्यं विरागतासिद्धितंत्रं ३७ दानादि दानमादिर्यस्य तत्। आदि शब्दाच्छीलं तपो भावना च तेषां पुष्टिं पोषणं कुरुत ॥ पुनः किं० । शब्दद्यूनक्षुधादेः (आदि शब्दग्रहणात् रूपरसगंधस्पर्शानां। मांससुरापानवेश्यापापर्द्धिस्तेयपरस्त्रीणां । क्रोधमानमायालोभानां च । शब्दद्यूतक्षुधादेरित्यत्रादिशब्देन प्रतिपदमेतेऽनुक्रमेण ग्राह्या) जयं कुरुत ॥ भूयः किंकुरुतेत्याह ॥ सुकृताहेषु सुकृतस्य पुण्यस्याहानि दिवसानि तेषु सत्कर्म मुक्त्यै सिद्ध्ये कुरुत ॥ इति द्वारकाव्यं व्याख्यातं ॥ २ ॥

हे भव्यजनो ! महाकष्टथी प्राप्त थयेला कोइ पुण्यना उदयथी आर्यदेशने, सारा कुलने, मनुष्य जन्मने अने साधु पुरुषना संगने पामीने मुक्तिने माटे सम्यक्त्वने· देव, गुरु अने धर्मने विषे शक्तिने· उपशमपणुं, यतिपणुं श्रावकपणुं अने श्रावकना बारव्रत तेना आराधनने सातक्षेत्र, जिनपूजन, न्याय विनय वैराग्य, दान, शील, तप अने

भावनीनां पुष्टिने शब्द, रूप, रस, गंध, स्पर्श, मद्य, मांस, सुरापान, वेश्यागमन, पापसंपात्ति, चोरी, परस्त्रीगमन, क्रोध, मान, माया, लोभ विगेरेना जयने अने पुण्यना दिवसने विषे सारा कार्यने करो.॥

हवे ये काव्यथी आर्यदेशनुं स्वरूप कहे छे.

(शार्दूलविक्रीडितवृत्तम.)

कोऽपि स्याल्लघुकर्मकः सुकृतधीर्देशेऽप्यनार्ये स्वत-
स्तस्याप्यार्द्रकुमारवद्गुणचयः कित्वार्यदेशाश्रयात्॥
क्षाराब्धौ शशिनोऽथ कौस्तुभमणेःसाश्रीः [illegible]
गंगाशालिनि शंभुमूर्ध्नि कमलागारे हरेश्चोरसि ॥ ३॥

कोऽपीति । कोऽपि कश्चिदनार्येऽपिदेशे म्लेच्छमंडलेऽपि स्वतः स्वयमेव लघुकर्मको लघु कर्म यस्येति सुकृतबुद्धिः [illegible] स्यात् भवेत् ॥ तस्य लघुकर्मकस्यापि कित्वार्यदेशाश्रयात् [illegible] युक्तदेशाश्रयणाद्गुणचयो गुणसमूहः स्यात् । किवत् । आर्द्रकुमारवत् । यथार्द्रकुमारो लघुकर्मकोऽनार्येऽपि देशे पुण्यबुद्धिरभूत् ॥ तद्वदन्यस्यापि जीवस्यार्यदेशाश्रयात् सम्यक्त्वादि लाभो भवति। अत्र लौकिकदृष्टांतमाह ॥ शशिनश्चंद्रस्य सा श्रीः शोभा क्षाराब्धौ क्षारसमुद्रे कुतः । या श्रीर्गंगाशालिनि जाह्नवीमनोहरे शंभुमूर्ध्नि हरमस्तकेऽभवत्। अथ शब्दश्चशब्दार्थः। कौस्तुभमणेश्च सा श्रीः शोभा क्षीरसमुद्रे कुतोऽभूत् । या श्रीर्हरेरुरसि नारायणस्य हृदयेऽभवत् । किंभूते हृदये । कमलागारे कमलाया आगारं कमलागारं तस्मिन् लक्ष्मीगृहे ॥ ३ ॥

कोइ लघुकर्मि जीव अनार्य देशने विषे उत्पन्न थइने पोतानी मेळे धर्मबुद्धिवालो थाय छे. तो तेने पण आर्द्रकुमारनी पेठे आ र्यदेशना आश्रयथी गुणसमूह प्राप्त थाय छे. इहां दृष्टांत कहेछे गंगाथी शोभता एवा शंकरना मस्तकने विषे चंद्रनी अने लक्ष्मीना निवास स्थान एवा कृष्णना हृदयने विषे कौस्तुभमणिनी जेवी शोभा छे. तेवी खारा समुद्रमां चंद्रनी अने कौस्तुभमणिनी शोभा क्यांथी होय ? अर्थात् नज होय. ॥ ३ ॥

आर्यं देशमवाप्य धर्मरहितोऽप्यन्यस्य धर्मक्रियां,
धर्मस्थानमहांश्च वीक्ष्य सुगुरोःश्रुत्वा च धर्मं क्वचित् ॥
बोधं याति कुलोत्थनास्तिकमतो भूपःप्रदेशी यथा.
सत्यं चंदनसंगिनःक्षितिरुहो नान्येऽपि किं चंदनाः ॥४॥

आर्यमिति । धर्मेणरहितो धर्मरहितः कोऽपि प्राणी । आर्यं देशमवाप्य प्राप्य बोधं याति उपदेशं गच्छति । किं कृत्वा । अन्यस्या न्यमनुजस्य धर्मक्रियां पुण्यकर्तव्यं वीक्ष्य दृष्ट्वा । च पुनः धर्मस्थान महान् धर्मस्य स्थानं तस्य महांस्तान् पुण्यस्थानमहोत्सवानवलोक्य ॥ पुनः किं कृत्वा । क्वचित् कदाचित् सुगुरोः सकाशात् धर्म्मं श्रुत्वाकर्ण्य ॥ क इव बोधं याति ॥ प्रदेशी भूप इव यथा प्रदेशी नाम राजाऽऽर्यं देशं लब्ध्वा धर्मरहितोऽप्यन्यस्य सुबुद्धिमंत्रिणो धर्मकार्यं दृष्ट्वा सुगुरोः केशिगणधरात् धर्म श्रुत्वा बोधं गतवान् तथाऽन्योऽपि ॥ किंभूतः प्रदेशी ॥ कुलोत्थं नास्तिकमतं यस्यसः कुलोत्थना स्तिकमतः कुलक्रमागतचार्वाकधर्म इत्यर्थः एवं विधोऽपि ॥ दृष्टांतमाह ॥ पूर्वोक्तस्वरूपं सत्यं । चंदनसंगिनश्चंदनवृक्षाश्लेषवंतः सं

तोऽपि क्षितिरुहो वृक्षाः किं चंदना नस्युश्चंदनवृक्षाः किं न भवं
ति ? अपि तु भवंत्येवेति ॥ ४ ॥

धर्मरहित प्राणी पण आर्यदेश पामीने, बीजाओनी धर्मक्रिया
तेमज धर्मना स्थानोना महोत्सवोने जोइने अने कोइ वखत सुगुरुथकी
धर्म सांभलीने कुलपरंपराथी नास्तिक मतवाला प्रदेशी राजानी
पेठे बोध पामे छे, ए सत्य छे. दृष्टांत कहछे के, चंदनवृक्षना स
गवालां बीजां वृक्षो पण शुं चदन नथी थतां ? अर्थात् थाय छे. ॥४॥

हवे बे काव्ये करीने कथमपि द्वार कहे छे.

उत्सर्पिण्यवसर्पिणीः क्षितिमरुत्तेजोप्स्वसंख्या वने-
ऽनंतास्ता विकले गणेयशरदो जात्याविपत्या नयेत् ॥
सप्ताष्टौ तु भवांस्तिरश्चि मनुजे जीवोंऽतरेत्रास्य चे-
द्धर्मस्तद्धरणेंद्रवत्स सुगतिं प्राप्नोति तिर्यङ्ङपि ॥ ५ ॥

॥ उत्सर्पीति ॥ जीवः प्राणी क्षितिमरुत्तेजोऽप्सु क्षितिश्च म
रुच्च तेजश्चापश्च क्षितिमरुत्तेजांसि आपस्तेषु पृथ्वीवायुवन्हिपानीयकायें
ष्वसंख्या उत्सर्पिण्यवसर्पिणीर्नयेत् प्रापयेत् भ्राम्यतीत्यर्थः ॥
वने वनस्पतिकायेऽनंता उत्सर्पिण्यवसर्पिणीर्नयेत् ॥ विकले वि
कलेंद्रिये गणेयशरदो गणनीयवर्षाणि नयेत् । कया । जात्या जन्म
ना विपत्त्या मरणेन । तिरश्चि तिर्यग्योनौ मनुजे मानुष्यभवे सप्ता
ष्टौ भवान् नयेत् । अथानंतरमपि एवं सत्यस्य जीवस्य चेद्यदि
धर्मः पुण्यं स्यात् । तदा तिर्यङ्ङपि जीवः सुगतिं प्राप्नोति ॥ किंव
दित्याह ॥ यथा धरणेंद्रः श्रीपार्श्वनाथदत्तनमस्कारश्रद्धानो
ऽहिः सर्पः सुगतिं प्राप तथाऽन्योऽपि ॥ ५ ॥

आ जीव पृथ्वीकाय, वाउकाय, तेउकाय अने अपकायने विषे असंख्य उत्सर्पिणी अने अवसर्पिणी काल निर्गमन करे, वनस्पतिकायने विषे अनंत उत्सर्पिणी अने अवसर्पिणी कालपर्यंत रहे. विकलेंद्रिय (बेइंद्रिय, तेरिंद्रिय अने चौरिंद्रिय) ने विषे जन्म मरणे करीने संख्याता वर्ष रहे अने तिर्यंच तथा मनुष्यने विषे सात अथवा आठ भव करे. जान आ छेल्ला गणावेला भवने विषे जो ते जीवने धर्म प्राप्त थाय, तो ते भलेने तिर्यंच होय, तो पण ते धरणेंद्रनी पेठे उत्तमगति मेळवे छे ॥ ५ ॥

कालप्राणिभवा अनादिनिधनास्तत्सर्वजातौ सदा.
जीवेन भ्रमता मुहूर्त्तमपि हि प्राप्तं न किंचिद्धितम् ॥
मुक्तासुक्तिकयेव वारिमाणिकवार्द्धौ कश्चिद्दैवत-
स्तत्प्राप्याथ सकंबलेन शबलेनोक्ष्णेव धार्यं श्रिये॥६॥

कालेति । कालप्राणिभवाः कालश्च प्राणी च भवश्च कालप्रा णिभवा अनादिनिधना आदिश्चनिधनश्चादिनिधनौ नास्त्यादिनि धनौ येषां ते तथा अजन्ममरणा वर्तंते । ततस्तादृशैः सर्वजातौ स मस्तयोनौ सदा सर्वदा भ्रमता पर्यटता जीवेन प्राणिना मुहूर्त्तमपि घटिकाद्वयमपि किंचिदल्पं हितं धर्मलक्षणं सुखं न प्राप्तं नोपल ब्धं ॥ अथ कश्चित् क्वापि प्रस्तावे दैवतोऽनुकूलदैववशात् तादृशं धर्मं प्राप्य लब्ध्वा जीवेन श्रियै लक्ष्म्यै धार्यं धेयं ॥ किंवत् । मुक्ता सुक्तिकयेव मुक्तायाः सुक्तिका तयेव । यथा मुक्तासुक्तिकया वा र्द्धौ समुद्रे कश्चिद्दैववशात् माणिक्यादि मौक्तिकादि लब्ध्वा लक्ष्म्यै ध्रियते तथा ॥ दृष्टांतमाह ॥ शबलेनोक्ष्णेव शबल नाम्ना वृषभेण ।

किंभूतेनोक्ष्णा ॥ सकंबलेन कंबलसहितेन । यथा पुरा कंबलौ द्वौ वृषभावभूतां । स्वामिमित्रेण कदाचिन्निर्दयं वाहितौ स्वामिप्राप्तजिनधर्मौ धर्मध्यानात्स्वर्गं जग्मतुस्ताभ्यामिव जीवेनापि ॥ ६ ॥

काळ, जीव अने संसार ए त्रण आदि अने अंत रहित छे, परंतु निरंतर सर्व योनिने विषे भमता एवा जीवे बे घडी मात्र पण कांइ हित मेळव्युं नहीं; पण जो जेम समुद्रमां मोतीनी छीपने क्यारेक दैवयोगे मोती बनावनार पाणी मळी जाय छे, तेम जीवने ए पुण्यरूप हित प्राप्त थइ गयुं, तो तेणे ते पकडी राखीने कंबल अने शंबल नामना बळदनी पेठे मोक्ष लक्ष्मीने अर्थे धारण करवुं.॥६॥

हवे बे काव्ये करीने नृभवद्वार कहे छे.

क्षेत्रे नामलवालुके च लवणाकीर्णे च रोहेद्यथा,
बीजं किंचिदिहाखिले च फलति क्षात्रे च नानाफलैः॥
देवे नैरयिके तिरश्चि मनुजे श्रेयःप्रसूतिस्तथा,
तस्मान्मेघकुमारवन्नरभवेऽनंतश्रिये त्वर्यताम् ॥७॥

॥ क्षेत्रे नेति ॥ यथा अमलवालुकेऽमला वालुका यस्मिन् तत्तस्मिन् निर्मलवालुकायुक्ते क्षेत्रे बीजं न रोहेन्नप्रादुर्भवेत । च पुनः लवणाकीर्णे लवणेनाकीर्णं लवणाकीर्णं तस्मिन् क्षारयुक्ते क्षेत्रेऽपि बीजं न रोहेदखिलेऽकृष्टे क्षेत्रे किंचिद्बीजं रोहेत । च पुनः क्षात्रे कृष्टे क्षेत्रे नानाफलैर्बीजं फलति ॥ तथा देवे सुरभवे नैरयिके नरकगतौ तिरश्चि पशुयोनौ मनुजे मनुष्यभवे श्रेयसःप्रसूतिः श्रेयःप्रसूतिर्धर्मोत्पत्तिः स्यात् ॥ तस्माद्धेतोर्मेघकुमारवत् गृहीतव्रतश्रेणिकसुतवन्नरभवेऽनंतश्रिये मोक्षश्रिये श्रेयःप्रसूतिर्त्वर्यतां शीघ्रं क्रियतां जीवैरिति शेषः ७

जेम आ लोकने विषे बीज निर्मल रेतीवाला खेतरमां उगतुं नथी. खारवाला खेतरने विषे उगतुं नथी. नहि खेडेला खेतरमां कांइक उगे छे अने खेडेला खेतरने विषे तो नाना प्रकारना फलोए करीने फले छे. तेवी रीते देवना, नारकीना तिर्यंचना अने मनुष्यना भवने विषे धर्मनी उत्पत्ति जाणवी. माटे हे जनो! तमे आ मनुष्य भवने विषे मेघकुमारनी पेठे मोक्ष लक्ष्मीने अर्थे उतावल करो. ॥७॥

(मंदाक्रांतावृत्तम्.)

वेलाकूले महति नृभवे प्राक्प्रसन्नेंदुवत्त-
ज्जिवा मूढश्लथदृढधियः क्रीणते कर्मवस्तु ॥
क्रूरा गुप्तिः कुगतियुगलीवर्णकः स्वर्दुरंतो,
येनांते स्याच्छिवपुरमुरुस्फूर्त्ति तेषां क्रमेण ॥८॥

॥ वेलाकूल इति ॥ जीवाः प्राणिनः कर्मवस्तु कर्म एव वस्तु कर्मवस्तु तत् क्रीणन्ति उपार्जयंति । कथंभूता जीवाः ॥ मूढश्लथदृढधियः संतः । मूढाश्च श्लथाश्च दृढधियश्च मूढश्लथदृढधियः वा मूढा श्लथा दृढा धीर्येषां ते । कर्मवस्तु क्व क्रीणते ॥ नृभवे मनुष्यभवे । कथंभूते नृभवे । वेलाकूले महति सुविस्तीर्णे ॥ किंवत् । प्रसन्नेंदुवत् । प्रसन्नचंद्रराजवत् ॥ तेषां मूढश्लथदृढधियां जीवानां क्रमेणेति । मूढधियां जीवानां कुगतियुगलीवर्णकः एवं कुगतिद्वयनिरूपकं । श्लथधियां च स्वः स्वर्गो दुरंतो भवेत् । दृढधियां चांते शिवपुरं मोक्षपुरं स्यात् ॥ येन वस्तुभूतेन वस्तुनेति सर्वत्र योजनं ॥ किंभूतं शिवपुरं । उरुस्फूर्तिर्यस्मिंस्तदुरुस्फूर्ति महत्प्रकाशमित्यर्थः ॥८॥

समुद्र समान विस्तीर्ण एवा मनुष्यभवने विषे मूढ, शिथिल ओ

दृढ बुद्धिवाला एम त्रण प्रकारना प्राणीओ, पूर्वे थइ गयेला प्रसंत चंद्रराजर्षिनी पेठे तेते कर्मरूप वस्तुने खरीद करे छे के, जे कर्मरूप वस्तुथी तेओ त्रणे अनुक्रमे नरक-तिर्यक रूप बे दुर्गतिनो वर्ण छे जेमां एवी दुःखरुप गति (१) दुःखथी पण स्वर्ग न पामवा रूप गति (२) अने अत्यंत प्रकाशमय मोक्ष गति (३) प्राप्त करेछे. ॥८॥

हवे बे काव्ये करीने सत्कुलद्वार कहे छे.

(इन्द्रवज्रावृत्तम्.)

तत्तादृशाभव्यपितुः सुतोऽपि,
धर्मालसो यः सुलसोऽभवन्न ।
स किं विषाहेर्विषहृन्मणिस्त-
त्पंकान्न वा श्रीसदनं सरोजम् ॥ ९ ॥

तत्तादृशेति ॥ यः सुलसो धर्मालसः पुण्यालस्ययुक्तो न बभूव ॥ किंलक्षणः सुलसः । तत्तादृशो महापापकारी अभव्य सारी अमोक्षगामी एवंविधः पिता कालिकसौरीकस्तस्य सुतो तदंगजोऽपि ॥ दृष्टांतमाह॥ सः विषयहृद्विषविनाशी मणिर्विषाहेः सर्पात् किं न स्यादपि तु स्यादेव । वा पुनस्तत्प्रसिद्धं श्रीसदनं लक्ष्मीस्थानं सरोजं कमलं पंकात् कर्दमात् किं नस्यादपि स्यादेव ॥ ९ ॥

जे सुलस नामनो पुरुष एक अभव्य पितानो पुत्र होवा छतां पण धर्मने विषे आलसवालो थयो नथी. दृष्टांत कहे छे के. विषवाला सर्पथी विषने हरनारं मणि शुं नथी उत्पन्न थतुं ? अथवा

तो कादवमांथी लक्ष्मीनुं गृह एवुं कमल शुं नथी उत्पन्न थतुं ? अर्थात् थाय छे. ॥ ९ ॥

बोधाय सद्धर्मकुलोद्भवाः स्त्रियो-
ऽप्युदायनस्येव पुरा प्रभावती ॥
सत्तीर्थता किं जलधेर्न गंगया,
सद्वृत्तता वा शशिनो न राकया ॥ १० ॥

बोधायेति ॥ स्त्रियोऽपि बोधाय स्युः ॥ कथंभूताः स्त्रियः । सद्धर्मः प्रधानधर्मस्तेनसाहितं कुलं तत्रोद्भव उत्पत्तिर्यासांताः सद्धर्मकुलोद्भवाः । केव । प्रभावतीव । यथा सा पुरा पूर्वमुदायनस्य राज्ञो बोधाय बभूव तथा । दृष्टांतमाह । जलधेः समुद्रस्य गंगया जाह्नव्या कृत्वा सत्तीर्थता पूज्यता किनस्यादपितु स्यादेव । वा पुनः शशिनश्चंद्रमसो राकया पूर्णमासीरात्र्या सद्वृत्तता सुष्टुवर्तुलता किं न स्यादपि तु यादेव ॥ १० ॥

पूर्वे थइ गयेला उदायन राजानी राणी प्रभावतीनी पेठे, सद्धर्मवाला कुलने विषे उत्पन्न थयेली स्त्रीयो पण बोधने अर्थे थाय छे. अर्थात् बोधनुं कारण थाय छे. दृष्टांत कहे छे के, समुद्रनुं उत्तम तीर्थपणुं गंगावडे शुं नथी थतुं ? अथवा तो चंद्रमानुं गोलाकारपणुं पूनमवडे शुं नथी थतु ? अर्थात् गंगाथी समुद्रनां तीर्थपणुं अने पूनमथी चंद्रमाने विषे गोलाकारपणुं थाय छे. । १० ॥

हवे बे काव्यथी साधुसंग द्वार कहे छे

(वसंततिलकावृत्तम्.)

जीवादितत्त्वविकलैर्विपुलैस्तपोभि-

मुक्तो न नामलिङ्गिभिरनाप्तगुणानुषंगः ॥
कः स्वर्णसिद्धिमभिगच्छति कल्ककल्पैः,
कोऽम्बुधिं तरति जर्जरयानपात्रैः ॥ ११ ॥

जीवादीति ॥ नामलिङ्गिभिर्नाममात्रऋषिभिर्मुक्तो न सिद्धो न जातः॥ किंविशिष्टैस्तपोभिः ॥ जीवादितत्त्वरहितैः जीवाजीव आदिर्येषु तानि जीवादीनि तत्त्वानि तैर्विरहितानि रहितानि तैः ॥ किंभूतस्तैर्नामलिङ्गिभिः । अजातः गुरूणामनुसंगो यस्य सः अनुप असुविहितसंगमः । दृष्टांतमाह । कल्ककल्पैर्मिथ्योपायैः स्वर्णसिद्धिं कोऽभिगच्छति ? अपि तु न कोऽपि प्राप्नोति । जर्जरयानपात्रैः जीर्णप्रवहणैरंबुधिं समुद्रं कस्तरति ? अपि तु न कोऽपि ॥ ११ ॥

उत्तम सुगुरुना संग रहित नामलिंगि तापस जीवादि तत्त्वे रहित एवा महा तपथी पण मुक्ति पाम्यो नहीं. दृष्टांत कहे छे के, खोटा औषधी प्रयोगथी कोने सुवर्णसिद्धि प्राप्त थाय? अने जीर्ण वहाणथी कोण समुद्र तरी शके? ॥ ११ ॥

(औपच्छंदासिकवृत्तम्.)

गिरिपुष्पशुकाविवामलोंगी,
गुणनाशोदयभाग् जडज्ञसंगात् ॥
जलदांबु विषं सुधा च न स्यात्,
कनकद्रौ च किमिक्षुकानने च ॥ १२ ॥

गिरिपुष्पेति ॥ अमलांगी निर्मलः प्राणी जडज्ञसंगात् जड-श्चज्ञश्च जडज्ञौ तयोः संगस्तस्मात् मूर्खपंडितसंयोगात् गुणनाशो दयभाग् गुणानामुदयवान् भवति गुणानां हानिवानपि स्यात् ॥ एतावता जडसंयोगात् प्राणी विद्यमानानपि गुणान् मुंचति पं-डितसंसर्गाच्च असतोऽपि दाक्षिण्यादीन् गुणानाश्रयति ॥ किंव-त् ॥ गिरिपुष्पशुकाविव गिरिशुकपुष्पशुकनामानौ पक्षिणाविव ॥ यथागिरिशुको भिल्लशुको जडानां भिल्लानां संसर्गान्निर्गुणो जा-तस्तथाच पुष्पशुकस्तापसशुकः पंडितानां तापसानां संपर्कान्निर्ग-णोऽपि गुणी जातः ॥ तथाचोक्तं ॥ माताप्येका पिताप्येको, मम तस्य च पक्षिणः ॥ अहं मुनिभिरानितः, स च नीतो गवाशिभिः ॥ १ ॥ गवाशनानां स गिरः श्रृणोति, अहं तु राजन् मुनिपुंग-वानाम् ॥ प्रत्यक्षमेतद्भवता च दृष्टं, संसर्गजा दोषगुणा भवंति ॥२॥ लौकिक दृष्टांतमाह ॥ जलदांबु मेघजलं कनकद्रौ धत्तुरके वृष्टं सद्विषं किं न स्याच्चेक्षुवने पतितममृतं किं न स्यादपि तु स्यादमृतमेव ॥१२॥

निर्मल प्राणी गिरिशुक अने पुष्पशुक नामना बे पोपटनी पेठे मूर्ख अने ज्ञानीनी संगतिथी अनुक्रमे निर्गुणी अने सद्गुणी थाय छे. दृष्टांत कहे छे के, मेघनुं जल धंतुराना वृक्षने विषे विष अने शेरडीना वनने विषे अमृत शुं थतुं नथी ? अर्थात् थाय छे ॥ १२ ॥

हवे बे काव्ये करीने बोधद्वार कहे छे.

(वसंततिलकावृत्तम्.)

प्राप्याल्पमप्यमलबोधवचांसि लातीं–

पुत्रो यथाघमलिनोऽपि बिभर्त्ति शुद्धिम् ॥
किं कोटिवेधिरसचंदनरत्नबिंदु-
स्पर्शेऽपि हेमशिशिरं च न तप्तलोहम् ॥१४॥

प्राप्येति ॥ अघं पापं तेन मलिनः प्राणी अल्पमपि स्तोकम- पि अमलबोधवचः अमलो निर्मलो बोधो यस्मिन् तदमलबोधं तथा तद्वचनंच तत् लब्ध्वा शुद्धिं नैर्मल्यं धत्ते ॥ क इव । चिलातीपुत्र इव । यथा चिलातीपुत्रः पापीयान् मुनेरुपदेशं लब्ध्वा शुद्धिं नैर्मल्यं निःपापतां बभार दधार ॥ दृष्टांतमाह ॥ तप्तलोहं अग्निना संतप्तं लोहं हेम सुवर्णरूपं शिशिरं शीतलं च किं न भवति ? अपि तु भवत्येव ॥ क्व सति ॥ कोटिप्रमाणं लोहं विध्यतीति सुवर्णं क- रोतीति कोटिवेधी एवं विधो रसो यस्यसः कोटिविधिरसः एवं विधं चंदनरत्नं गोशीर्षचंदनं तस्य बिंदुस्तस्य स्पर्शेऽपि ॥ १४ ॥

पापथी मलीन थवाय पण चिलाती पुत्रे अल्प पण निर्मल ए- वा बोधकारी वचन सांभली निर्मलपणुं धारण कर्युं दृष्टांत कहे छे के, तपावेलुं लोढुं कोटिवेधीरस (क्रोडो मण लोढाने सुवर्ण व- नावनार रस) रुप गोशीर्ष चंदनरत्नना टीपाना स्पर्शथी शुं शीतल सुवर्ण नथी थतु ? अर्थात् थाय छे. ॥ १४ ॥

द्वेषेऽपि बोधकवचःश्रवणं विधाय,
स्याद्रौहिणेय इव जंतुरुदारलाभः ॥
क्राथोऽप्रियोऽपि सरुजां सुखदो रविर्वा,
संतापकोऽपि जगदंगभृतां हिताय ॥ १५ ॥

द्वेषेऽपीति ॥ जंतुः प्राणी द्वेषेऽपि बोधकवचःश्रवणं बोधकारी वचनाकर्णनं कर्णाभ्यां विधाय कृत्वा रौहिणेयश्चौर इव उदारलाभो भवति ॥ लौकिक दृष्टांतेनैतदेव दृढयति ॥ क्वाथोऽप्रियोऽपि कटुकोऽपि सरुजां सव्याधीनां रोगिणां नराणां सुखदः सुखदाता नीरोगताकारी स्यात् । वा पुनर्द्वितीय दृष्टांते । रविः सूर्यः संतापकोऽपि जगदंगभूतां भूलोकप्राणिनां हिताय हर्षाय भवति ॥ १९ ॥

अरुचि छतां पण बोधकारी वचन सांभलवाथी प्राणी, रोहिणेय चोरनी पेठे अत्यंत लाभ संपादन करे छे. अहिं दृष्टांत कहे छे के, अप्रिय (कडवो) एवोय पण क्वाथ रोगी माणसने सुखकारी छे अने ताप आपनारो एवोय पण सूर्य जगत्ना प्राणीयोने हितकारी छे. ॥१९॥

हवे बे काव्यथी सम्यक्त्व द्वार कहे छे.

कोऽप्यन्य एव महिमा ननु शुद्धदृष्टे-
र्यच्छ्रेणिको ह्यविरतोऽपि जिनोऽत्र भावी ॥
पुण्यार्गलः किमितरोऽपि न सार्वभौमो,
रूपच्युतोऽप्यधिगुणास्त्रिजगन्नतश्च ॥ २० ॥

कोऽप्यन्येति ॥ शुद्धदृष्टेः शुद्धा दृष्टिर्यस्य सस्तस्य निर्मलसम्यक्तस्य नरस्य ननु निश्चितं कोऽपि अन्यैव महिमा प्रभावः स्यात् ॥ यद्यस्माच्छ्रेणिको नाम भूपतिरविरतोऽपि विरतिरहितोऽप्यत्र भरतक्षेत्रे जिनः पद्मनाभनामा तीर्थंकरो भावी भविष्यति ॥ एतावता श्रेणिकराजा सम्यक्तेनैव तीर्थंकरनामगोत्रमुपार्जयामास ॥ दृष्टांतमाह ॥ इतरोऽपि सामान्योऽपि जनः पुण्यार्गलः पुण्याधिकः

सन् किं सार्वभौम सपुण्यपूर्णोऽपि सार्वभौमो न स्यादपि तु स
र्वभौमो भवति। रूपच्युतो रूपरहितोऽपि गुणोऽधिकगुणवान्
रूपरहितता वैलक्षण्येन नतो नमस्कृतः किं न स्यादपि तु स्या
देव ॥ १६ ॥

निश्चे सम्यक्त्वना प्राणिनो कोइ विलक्षण प्रभाव होय छे का
रणके. अविरति (विरति नहि पामेलो) छतो पण श्रेणिक राजा
आ भरतक्षेत्रने विषे तीर्थंकर थशे. दृष्टांत कहेछे के. सामान्य प
होय पण कोइ महा पुण्यवंत पुरुष शुं सर्व पृथ्वीना राज्यने भोग
वनारो न थाय ? अथवा तो रूपरहित छताय पण गुणवान् पुरुष
शुं सर्व लोकने नमस्कार करवा योग्य नथी थतो ? अर्थात् थाय
छे ॥ १६ ॥

तद्दर्शनं किमपि सा सुलसाप येन,
प्रादाज्जिनोऽपि महिमानममानमस्यै ॥
नैर्मल्यतः शशिकला न च केतकीत्वं,
मालातुलां च हरमूर्ध्नि बभार गंगा ॥ १७ ॥

तद्दर्शनमिति ॥ सा सुलसा तत् किमप्यपूर्वं दर्शनमाप लेभे।
येन सम्यक्तदर्शनेन जिनोऽपि वीरोऽपि. अस्यै सुलसायै अमानं
गरिष्ठं महिमानं माहात्म्यं प्रादात् ॥ एतावता वीरः सुलसाया
व्याख्यानं सम्यक्तेनैव चकार।तत्प्रमाणं सम्यक्तस्यैवेत्यर्थः॥ दृष्टां
तमाह॥ शशिकला चंद्रकला हरमूर्ध्नि शंकरमस्तके तिलकरूपत्वात्
केतकीत्वं केतकीरूपतां न बभार न दधार! अपि तु बभारैव। च

इको थयो हतो, ते पण शुं उत्तम देवता नथी थयो ? दृष्टांत कहे छे के, कल्पवृक्ष फक्त स्मरण करवाथी शुं इष्टफल नथी आपतुं अथवा तो समीपे पडेली कस्तुरी शुं सुगंध नथी आपती ? अर्थात् आपे छे. ॥ १८ ॥

(इन्द्रवज्रावृत्तम्)

ध्यातः परोऽक्षेऽपि जिनस्त्रिशुद्ध्या,
जीर्णाभिधश्रेष्ठिवदिष्टसिद्ध्यै ॥
सिंधुप्रवृद्ध्यै कुमुदौघलक्ष्म्यै,
चकोरतुष्ट्यै विधुरभ्रगोऽपि ॥ १९ ॥

ध्यातरिति ॥ जिनः परोऽक्षेऽपि अप्रत्यक्षेऽपि ध्यातः स्मृतः सन् इष्टसिद्ध्यै वांछितसिद्ध्ये स्यात् ॥ कया ध्यातः ॥ त्रिशुद्ध्या त्रयाणां मनोवाक्कायानां शुद्धिर्नैर्मल्यं तया ॥ कस्येव ॥ जीर्णाभिधश्रेष्ठिन इव ॥ दृष्टांतमाह ॥ अभ्रग आकाशस्थो विधुश्चंद्रः सिंधुप्रवृद्ध्यै समुद्रवृद्धये कुमुदानां कमलविशेषाणामोघस्य समूहस्य शोभायै च चकोराणां चकोरपक्षिणां हर्षाय च भवति ॥ १९ ॥

जिनेश्वर प्रभु प्रत्यक्ष न होय तोपण त्रिकरण शुद्धिवडे ध्यान करवाथी जेम जीर्ण शेठने आपी तेम सर्व माणसोने वांछित सिद्धि आपे छे. दृष्टांत कहे छे के, आकाशमां रहेलो एवोय पण चंद्र समुद्रनी वृद्धिने माटे, कमलना समूहनी शोभाने माटे अने चकोर पक्षीना हर्षने अर्थे थाय छे. ॥ १९ ॥

हवे बे काव्यथी गुरुद्वार कहे छे.

(वसंततिलकावृत्तम्)

नव्यो गुरुः सुरतरुर्विहितामितर्द्धि-
र्यत्केवलाय कवलार्थिषु गौतमोऽभूत् ॥
तापातुरेऽमृतरसः किमु शैत्यमेव,
नाप्रार्थितोऽपि वितरत्यजरामरत्वम् ॥ २० ॥

नव्यारिति ! गुरुर्नव्यो नवीनः सुरतरुः कल्पवृक्षः ॥ किंभूतः ॥ विहिता कृता आमिता अप्रमाणा ऋद्धिः श्रीर्येनसस्तथा ॥ यस्मात्कवलार्थिषु पारणार्थिषु तापसेषु केवलाय केवलज्ञानाय गौतमः समभूत ॥ एतावता वांछितादप्यधिकं दत्ते गुरुः । अतएव नवीनः कल्पद्रुः । कल्पद्रुमो वांछितं दत्ते नावांछितं दत्ते न वांछितादधिकं ॥ दृष्टांतमाह ॥ अप्रार्थितोऽपि अयाचितोऽपि अमृतरसः तापातुरे तापाक्रांते नरे किं शैत्यमेव वितरति करोति । किमु अजरामरत्वं न वितरति ? अपि तु वितरत्येव ॥ २० ॥

प्रमाण विनानी ऋद्धि आपनारा गुरु नवीन कल्पवृक्ष समान छे कारण के, गौतम ऋषि कवलनी 'अन्ननी' याचना करनारा (तापसो) ने केवलज्ञानने अर्थे थया. दृष्टांत कहे छे के, प्रार्थना नहि करेलो एवो पण अमृतरस. तापथी आकुल थयेलाने फक्त शीतलताज आपे छे. शुं अजरामरपणुं नथी आपतो ? ॥ २० ॥

(पृथ्वीवृत्तम्.)

कुबोधमतयोऽभितः कुगुरवो जमाल्यादिवत्.
पुनः क्वचन वज्रवत्सुगुरवोऽमला जन्मनः ॥

रज्यंति शय्यंभववन्न जाड्ये ॥
पीत्वा सिताभावितधेनुदुग्धं,
को वाम्लतक्रार्कपयांसि पश्येत् ॥२२॥

विज्ञायेति ॥ धन्याः सुभाग्याः जिनधर्ममर्म विज्ञाय ज्ञात्वा जाड्ये मुग्धत्वे न रज्यंति न रागं कुर्वंति ॥ किंवत् ॥ शय्यंभववत् यथा शय्यंभवो ब्राह्मणः " अहो कष्टं तत्त्वं न ज्ञायते क्वचित् " इति साधुवचनं श्रुत्वा गुरोस्तत्त्वमपृच्छत् मिथ्यात्वाद्यागमाद्विरक्तः सन् प्रव्रज्यां गृहीत्वा संभासेभिर्गभिरः शय्यंभवनामा आचार्योऽभूत् ॥ दृष्टांतमाह ॥ सिता शर्करा तया भावितं मिश्रितं धेनुदुग्धं पीत्वा आस्वाद्य को वा क इव पुरुषः आम्लतक्र अर्कपयांसि अर्कदुग्धानि पश्येत विलोकयेत । अपि तु न कोऽपि गवेषयेत ॥ २२ ॥

धन्य पुरुषो जिनधर्मना मर्मने जाणीने [illegible] कुत- नोने विषे राग करता नथी. दृष्टांत कहे छे के [illegible] मिश्रित भावना दूधने पीधा पछी कयो पुरुष [illegible] आकडाना दूध सामुं जोवे? [illegible] ॥ २२ ॥

लब्धेऽपि जडः कोऽपि हितेऽपि धर्मे,
स्रोतस्विनीरत्नानि [illegible] ॥
न पंकजं भेक उपैति पंकं,
[illegible] नाप्नोति [illegible] ॥ २३ ॥

[illegible]

शशीराजेव ॥ यथा शशी राजा जिनधर्मे प्राप्तेऽपि इंद्रियसुखार्थी बभूव ॥ तद्वत्सोऽपि जडएव ॥ दृष्टांतमाह ॥ भेको दर्दुरो पंकजं कमलं नोपैति न याति किंतु पंकं कर्दमं याति॥ क्रमेलक उष्ट्रः आम्र नेयर्ति न याति परं निंबं याति । नीचो नीचस्थानं यातीत्यर्थः॥२२॥

हितकारक एवा धर्म प्राप्त कर्या छता कोइकज मूर्ख पुरुष शशी राजानी पेठे इंद्रिओना सुखने वखाणे छे. दृष्टांत कहे छे के, देडको, कमल प्रत्ये न जता कादव प्रत्ये जाय छे अने उंट आंबा समीपे न जता लींबडा पासे जाय छे अर्थात् नीच पुरुष नीच स्थानके जाय छे. ॥ २२ ॥

हवे बे काव्यथी शक्तिद्वार कहे छे.

(शार्दूलविक्रीडितवृत्तम्)

अष्टाब्दोऽपि तथाविधव्रततपःस्वाध्यायकृत्यासहोऽ-
प्युच्चैर्ध्यानबलेन कर्मरिपुभिर्मुक्तोऽतिमुक्तो मुनिः ॥
शक्त्या गच्छत तन्न किं हितपथं मुक्त्वा प्रमादोत्तरं।
श्रूयंते च मदालसातनुभुवो बाल्येऽपि योगोज्वलाः॥२

अष्टाब्दोऽपीति ॥ अष्टाब्दोऽपि अष्टवार्षिकोऽपि तथाविधा तादृशानां दुष्कराणां व्रतानामहिंसादीनां तपसां द्वादशविधा स्वाध्यायानां च कृत्येषु करणीयविधिषु असहोऽसमर्थो लघुत्वात् एवं विधोऽपि उच्चैर्ध्यानबलेन कर्मरिपुभिर्मुक्तो रहितो बभूव ॥कः अतिमुक्तकऋषिस्तत्तस्मात् कारणात् शक्त्या अंतरंगमनोबलेन हित पथं धर्ममार्गं किं न गच्छत ॥ किंकृत्वा ॥ प्रमाद एवोत्तरं उत्कट

लस्यं मुक्त्वा ॥ दृष्टांतमाह ॥ मदालसापुत्रा बाल्येऽपि योगोज्वला ध्याननिर्मलाः श्रूयंते आकर्ण्यंते ॥ २३ ॥

आठ वर्षनी वयना अने तेवी बाल्यावस्थाने लीधेज ते ते प्रकारना अहिंसादि व्रत. मासक्षपणादि तप अने स्वाध्याय करवाने असक्त एवा अतिमुक्त मुनि पोताना उत्कृष्ट एवा ध्यान बलवडे कर्मरूपी शत्रुथी मुक्त थया. माटे हे भव्यजनो! तमे महा प्रमादने त्यजी शक्तिये करीने हितकारी एवा मार्ग प्रत्ये केम जता नथी? कारण के. मदालसाना पुत्रो बाल्यावस्थाने विषे पण ध्यानमां निर्मल थयेला संभलाय छे. ॥ २३ ॥

(वसंततिलकावृत्तम्.)

शीलं तपश्च बलदेवमुनिश्चरित्वा,
दानं प्रदाय रथकृत्त्रितयेऽप्यशक्तः ॥
एणो मुदा तदनुमोदनया सुरोऽभू-
द्योगाद्धि सिद्धिमगमन्नतुरंगितांहिः ॥ २४ ॥

शीलमिति ॥ बलदेवमुनिर्बलदेवः कृष्णस्य वृद्धभ्राता शीलं तपश्च चरित्वा आचर्य रथकृद्रथकारकश्च बलदेवमुनये इति शेषः दानं प्रदाय दत्वा सुरोऽभूत् देवोजातः । एणो मृगो मुदा हर्षेण तदनुमोदनया तस्य अनुमोदना तदनुमोदना तया बलदेवशील तपःकरणस्यानुमोदनया रथकारकदानप्रदानानुमोदनया च देवोऽभूत् । कथंभूतः एणः? त्रितये शीलतपोदानेऽपि अशक्तः असमर्थः । दृष्टांतमाह । हि यस्मान्नतुरंगितांहिःश्चतुरंगपादपुत्रो

योगात् समाधेर्बलात् सिद्धिमगमत् सिद्धिं जगाम ॥ २४ ॥

कृष्णना म्होटाभाइ बलदेवमुनि शील अने तपनुं आचरण करी देवता थया, रथकार (सुथार) दान आपीने देवपदवि पाम्यो अने हरिण शील, तप अने दानमां असमर्थ छता तेओनी अनुमोदनाथी देवता थयो. उपर कहेलुं सर्व योग्य छे. कारण के, चतुरंगी पुरुष समाधिना बलथी सिद्धिपदने पाम्यो छे. ॥ २४ ॥

हवे बे काव्यथी शमद्वार कहे छे.

(उपेंद्रवज्रावृत्तम्)

शमेन सिद्ध्यंति मतानि कृष्णा–
नुजर्षिवत्तीव्रतपोऽस्तु वा मा ॥
दिनाधिनाथेन कृतेऽन्नपाके,
संधुक्षणं कः कुरुतेऽनलस्य ॥ २५ ॥

शमेनेति ॥ शमेन क्षमया मतानि वांछितानि सिद्ध्यंति सिद्धिं यान्ति । तीव्र तपोऽस्तु भवतु वाऽथवा मा भवतु तपोविनैव शमेन मनोवांछितानि सिद्ध्यंतीत्यर्थः । किंवत् । कृष्णानुजर्षिवत् । कृष्ण महाराजलघुभ्राता गजसुकुमालमुनिरिव । यथा गजसुकुमालः तपोविनैव श्वसुरेणापि कष्टं सहमानः शमेनैव सिद्धवानित्य । दृष्टान्तमाह । दिनाधिनाथेन सूर्येण अन्नपाके धान्यपचने कृते सति कः पुमाननलस्याग्नेः संधुक्षणं कुरुते ? न कोऽपीत्यर्थः ॥ २५ ॥

तीव्र तपश्चर्या करो अथवा न करो परन्तु मननी अभिलाषाओ कृष्ण महाराजना नाना भाइ गजसुकुमालनी पेठे शमताथी

सिद्ध थाय छे. दृष्टांत कहे छे के. सूर्यथी अन्न पाके छते कयो पुरुष अग्निने सळगावे? अर्थात् कोइ न सळगावे. ॥ २५ ॥

(वसंततिलकावृत्तम्)

प्रीत्यै शमी स्वपरयोरपि चंडरुद्र-
शिष्यो यथात्मनि गुरावपि केवलर्द्धयां ॥
सतर्षिसंगतिमवाप्य विशाखनामा,
चौरोऽप्यभूद्विलसदुज्वलदिव्यशक्तिः ॥२६॥

प्रीत्या इति ॥ शमी समावानरः स्वपरयोरपि आत्मनः परस्यापि च प्रीत्यै हर्षाय भवति । क इव । चंडरुद्रशिष्य इव । यथा चंडरुद्रशिष्य आत्मनि गुरावपि चंडरुद्रनामनि आचार्येऽपि केवलर्द्धयां केवलज्ञानेन प्रीतये बभूव । दृष्टांतमाह ॥ विशाखनामा चौरः सप्तर्षिसंगतिं चित्रशिखंडिनसंयोगं प्राप्य विलसदुज्वलदिव्यशक्तिर्यस्य स तथा एवंविधोऽभूत् ॥ २६ ॥

जेम शमतावाळो चंडरुद्राचार्यनो शिष्य. केवल ज्ञाननी समृद्धिये करीने पोताने विषे तथा गुरुने विषे प्रीतिवाळो थयो. तेम बीजो शमतावाळो प्राणी पण पोताने तथा परने विषे प्रीतिवाळो थाय छे दृष्टांत कहे छे के. विशाख नामनो चोर पण सप्तर्षिना संगने पामीने प्रकाशित उज्वल दिव्य शक्तिवाळो थयो. ॥ २६ ॥

हवे वे काव्ये करीने यतिद्वार कहे छे.

(मालिनीवृत्तम)

व्रतमपि बहुचीर्णं सातिचारं कुगत्यै,

दिनमपि शुचि मुक्त्यै कुंडरीकादिवत्तत् ॥
अहह दहति चित्रावारिपूरोऽपि शस्यं ।
भृशमपि कृशपाथः स्वातिजं पाति जंतून् ॥२७॥

व्रतमपीति। व्रतमपि बहुकालचीर्णं कृतं सत् सातिचारं अति-चारसहितं कुगत्यै नरकाय भवति। तदव्रतं शुचि निर्मलं दिनमपि एकदिनमपि पालितं सत् मुक्त्यै सिद्धये स्यात् । किंवत्। कुंडरिकादिवत्। कुंडरिक पुंडरिकवत् । यथा कुंडरिकस्य बहुकालं चीर्णमपि सातिचारं सद्व्रतं नरकायाऽभूत्। पुंडरिकस्य चैकदिनमपि पालितं व्रतं निर्मलं सत् मुक्त्यै बभूव। तथाऽन्यस्यापि। दृष्टांतमाह। अहह इति खेदे चित्रानक्षत्रवारिपूरोऽपि शस्यं धान्यं दहति भस्मी करोति। भृशमपि अत्यर्थमपि कृशपाथः स्तोकजलं स्वातिजं स्वातिनक्षत्रोत्पन्नं सत् जंतून् प्राणिनः पाति पालयति रक्षतीत्यर्थः ॥२७॥

चिरकाल पर्यंत पण अतिचार युक्त पालेलुं व्रत कुगतिने अर्थे थाय छे अने तेज व्रत एक दिवस पण निरतिचारपणे पाल्युं होय तो पुंडरिकादिकनी पेठे मुक्तिदाता थाय छे. ते उपर दृष्टांत कहे छे ए खेदनी वात छे के, चित्रा नक्षत्रमां वरसेलो बहु मेघ पण धान्यने बाळी नाखे छे अने स्वाति नक्षत्रमां वरसेलो अल्पमेघ सर्व प्राणीओनुं रक्षण करे छे. ॥ २७ ॥

(पृथ्वीवृत्तम्)

व्रतेन शुचिनापि किं किमथ सद्गुरूपासनै-
रुदायिनृपमारकश्रमणवत्सपापात्मनः ॥

शिरस्थविषहृन्मणिः फणिगणः किमानंदनः,
स चंदनवनास्थितः किमथवा जगतापहृत् ॥२८॥

व्रतेनेति । सपापः पापान्वित आत्मा जीवो यस्य स सपापात्मा तस्य पापपुरुषस्य शुचिनापि निर्मलेनापि व्रतेन किं । अथवा सद्गुरूपासनैः सुगुरुसेवाभिरपि किं नाकिंचित्फलमित्यर्थः । किंवत् । उदायिनृपमारकश्रमणवत् । यथा उदयिराजा कौणिकपुत्रस्तस्य मारको विनाशकारी श्रमणो मुनिस्तस्य निर्मलेनापि व्रतेन फलं किमपि न जातं । दृष्टांतमाह । शिरस्थो मस्तके वर्त्तमानो विषहृत् विषापहारी मणिर्यस्य स तथा एवं विधोऽपि फणिगणः सर्पसमूहः किमानंदनः किं हर्षकारी स्यादपि तु न प्रत्युत विध्वंसको भवति । अथवा स सर्पसमूहः चंदनवनास्थितः चंदनवनचेष्टनकारकोऽपि जगतापहृत् जगत्तापहारी विश्वसंतापनिवारकः किं स्यादपि तु न॥

उदायि राजाने मारनार साधुनी पेठे पापयुक्त छे मने जेनुं एवा पुरुषने पवित्र व्रते करीने शुं ? अथवा तो सद्गुरुनी उपासना वडे करीने पण शुं ? अर्थात् कांइ नहीं. दृष्टांत कहे छे के मस्तक उपर विषापहारी मणिने धारण करनारो सर्पसमूह शुं आनंद आपनारो छे? अथवा तो चंदनना वनने विषे क्रीडा करनारो तेज सर्पसमूह शुं जगत्ना तापने दूर करनारो छे? अर्थात् नथी. ॥ २८ ॥

हवे त्रण काव्ये करीने श्रावकद्वार कहेछे.

(स्रग्धरावृत्तम्)

साधोरन्हाय सिद्धिः सुचरणकरणैः श्रावकस्यापि हि स्या-

न्मध्येऽष्टानां भवानां शशिनिभदगुणानंदना नंदवृत्तैः ॥
चेत्पोतैः शीघ्रगाभिर्जलधिजलपथैस्तीरदेशेषु पांथाः ।
केचिद्यान्त्याशु नान्ये हयकरभरथैर्भूपथैः किं क्रमेण ॥२९॥

साधोस्त्यागेनेति ॥ साधोर्मुनिराजस्य सुचरणकरणैः सुष्टुचारि-
त्रोपरिपालनेन्नाय शीघ्रं सिद्धिर्मोक्षः स्यात् हि निश्चितं । अष्ट-
नां भवाना मध्ये श्रावकस्यापि सिद्धिर्भवति । किं कृत्वा श्रावक-
स्यापि सिद्धिर्भवतीत्याह । शशिविपदगुणानंदनानंदवृत्तैः शशिव-
द्विशदा निर्मला ये गुणास्तैरानंदनो हर्षकारी योऽसौ आनंदनाना
श्रावकस्तस्यैव वृत्तराचरणैः कृत्वा । अथ दृष्टांतमाह । चेद्यदि के-
चित् पांथाः पथिकाः शीघ्रगाभिः शीघ्रगतिकाभिर्नौभिर्बोडिभिः
कृत्वा जलधिजलपथैः समुद्रस्य जलमार्गैस्तीरदेशेषु समुद्रतटावप-
रदेशेषु आशु शीघ्रं यांति गच्छंति तत् तर्हि क्रमात् क्रमेण शनैः
शनैरन्ये स्थलचारिणः पुरुषाः हया अश्वाः करभा उष्ट्रा रथा स्यंदना
एतैःकृत्वा भूपथैः स्थलमार्गैः किं न यांति? अपि तु शनैः शनैस्तीर
देशेषु यांति । एतावता साधुः कृतसर्वसंगपरित्यागः शीघ्रं सि-
द्ध्यति श्रावकस्तु शनैः शनैः सदाचारैः सिद्ध्यतीतिभावः ॥२९॥

रुडुं चारित्रपाळवाथी साधुनी शीघ्र सिद्धि थाय छे. श्रावकनी
पण चंद्र समान निर्मल गुणथी आनंदकारी आनंद नामना श्रावक-
ना सरखा आचरणे करीने आठ भवमां सिद्धि थाय छे. दृष्टांत क-
हे छे के, जो केटलाक मुसाफरो शीघ्रजनारा वहाणथी जलमार्गे
सामातीरे जलदी पहोचे छे तो बीजा मुसाफरो अश्व उंट

चाडे छे; माटे मिथ्यात्व रूप राजाना शंका कांक्षादिक अधमोरो
थी ए श्रावकधर्मरूप अश्व यत्नेकरी रक्षण करवा योग्य छे. ॥ ३० ॥

अक्षुद्रो रुपसौम्यो विनयनययुतः क्रूरताशल्यमुक्तो,
मध्यस्थो दीर्घदर्शी परहितनिरतो लब्धलक्षः कृतज्ञः॥
सद्दाक्षिण्यो विशेषी सदयगुणरुचिःसत्कथः पक्षयुक्तो,
वृद्धार्हो लज्जनो यः शुभजनदयितो धर्मरत्नस्य योग्यः।३१॥

श्रावकाणां गुणानाह । अक्षुद्रेति । एवंविधः श्रावकः सद्धर्म एव रत्नं तस्य योग्यः कथ्यते।अक्षुद्रोऽपरछिद्रान्वेषी १ रूपेण सौम्यः रूपसौम्यः सभामंडनत्वाद्गुणद्वयं रुपवान् २ सौम्यश्च ३ विनयो गुरुजनादीनां नम्रीभावः नयः न्यायमार्गः ताभ्यां युतःसहितः विनयी ४ नयी ५ क्रूरता रौद्राकारता शल्यं मायाविल्वं ताभ्यां मुक्तः रहितः क्रूरतामुक्तः ६ मायारहितः ७ मध्यस्थो न कदाग्रही ८ दीर्घदर्शी अग्रेतनशुभचिंतकः ९ परहितनिरतः अन्यवात्सल्य तत्परः १० लब्धलक्षः अवसरज्ञाता ११ कृतज्ञः कृतं कार्यं जानातीति कृतज्ञः कार्यज्ञः १२ सद्दाक्षिण्यः सत्प्रधानं दाक्षिण्यं अनुकूल त्वं यस्यसतथा श्रेष्ठसरलभाववान् १३ विशेषी विशेषो विद्यते यस्मिन्स विशेषी विशेषज्ञ इत्यर्थः १४ सदयो दयावान् १५ गुणरुचिः गुणेरुचिर्यस्यस गुणरुचिः गुणानुरागीत्यर्थः १६ सत्कथः सती प्रधाना कथा वार्ता यस्य स सत्कथः स्त्रीकथा भक्तकथा देशकथा राजकथा भेदाच्चतुर्विधा कथा तया रहित इत्यर्थः१७ पक्षयुक्तः उभय पक्षविशुद्धः १८ वृद्धार्हः स्पष्टमेव १९ लज्जनो लज्जावान् २०

द्रुमः कल्पवृक्षः कनकाचलस्य मेरोः चूलायां चूलिकायां रमते कि
ष्ठति मरौ मरुस्थल्यां न रमत एव । यः स्वःपतेरिंद्रस्य द्वारेऽस्ति
स चैरावणो हस्ती कुनृपतिद्वारे किं स्यादपि तु न ॥ ३२ ॥

प्राणीओने विषे दया धर्मरूप धर्म सर्व धर्मोमां श्रेष्ठ छे अने
तेज कारणथी ते दयाधर्म श्री वज्रायुद्धचक्रवर्ती जेवा पुरुषोना हृ
दयमां रहेलो छे. संगमदेव प्रमुखना हृदयमां रहेलो नथी. दृष्टांत
कहे छे के, कल्पवृक्ष मेरु पर्वतनी चूलिका उपर होयछे, परतु मरु
भूमिने विषे होतुं नथी. वली इंद्रना द्वारने विषे रहेनारो ऐरावण हस्ती
बीजा तुच्छ राजाने त्यां शु होय खरो ? अर्थात् नज होय.॥३२॥

एका जीवदयैव नित्यसुखदा तन्नेमिना स्वामिना,
कन्याराज्यधनादि फल्गुतृणवत् संत्यज्य सैवादृता ॥
सोऽर्हन्वास्य किमुच्यते निजहिते नान्योऽपि मंदायते,
किं कस्याप्यजरामरत्वमथवा नेष्टं सुखं शाश्वतम् ॥३३॥

एकेति । एका अद्वितीया जीवदयैव नित्यं सुखंददातीति नि
त्यसुखदा शाश्वतसुखदा । तत्तस्मात् कारणात् श्रीनेमिना श्रीने
मिनाथेन स्वामिना फल्गुतृणवन्निरर्थकतृणवत् । कन्या राजीमती
राज्यं पृथ्वीसाम्राज्यं धनं द्रव्यं तत्प्रभृति संत्यज्य मुक्त्वा सर्वसुख
दायिनी सैव जीवदयैव आदृता अंगीकृता । स श्रीनेमिनाथोऽर्हन्
तीर्थकरस्तस्य किमुच्यते किं कथ्यते । अन्योऽपि सामान्योऽपि
जनः आत्मीयहित स्वेष्टसाधने न मंदायते न आलस्यवान् भवति ।
कस्य पुरुषस्य अजरामरत्वमथवा शाश्वतं सुखं किं नेष्टं? अपि तु
सर्वस्यापीष्टम् ॥ ३३ ॥

एकली जीवदयाज नित्यसुख आपनारी छे माटे श्री नेमिनाथ प्रभुए राजीमती कन्या, म्होटुं राज्य अने धन विगेरेनो तुच्छ तृणनी पेठे त्याग करीने ए जीवदयानो अंगीकार कर्यो हतो. अरे! ए श्रीनेमिनाथ तो तीर्थंकर हता एटले एमनी तो शी वात करवी? परंतु कोइ बीजो साधारण माणस होय तो ते पण पोताना हितने विषे एज आचरण करतो नथी अथवा तो शुं कोइ जीवने अजरामरपणुं के शाश्वतसुख इष्ट नथी लागतुं? अर्थात् सर्वने अजरामरपणुं अने शाश्वतसुख इष्ट छे. ॥ ३३ ॥

हवे बे काव्यथी मृषावाद विरमणद्वार केहेछे.

(रथोद्धतावृत्तम्.)

संकटेऽपि न महान् मृषा वदे-
द्दत्तमातुलककालिकार्यवत् ॥
चंदनः सुरभिरश्मघर्षणेऽ-
पीलुरुत्कटतरोऽपि पीलने ॥ ३४ ॥

संकट इति । महान् उत्तम पुरुषः संकटेऽपि विपद्यपि मृषा कूटं न वदेत् न ब्रूयात् । किंवत् । दत्तस्य मातुलकः स चासौ कालिकार्यश्च तद्वत् । कालिकार्यैः संकटेऽपि कूटं न उक्तमित्यर्थः । दृष्टांतमाह । चंदनः अश्मनि पाषाणे घर्षणेऽपि सति सुरभिः परिमलाढ्यो भवति । पीलुः पीलनेऽपि अत्युत्कटः अत्यंतकटुः भवति.

महान् पुरुष संकटने विषे पण [illegible]

चार्यनी पेठे असत्य वोले नही. दृष्टांत कहे छे के, चंदन
साथे घसाया छता सुगंध आपेछे अने शेरडी पीलाया
अद्भुतरस आपे छे. ॥ ३४ ॥

(शार्दूलविक्रीडितवृत्तम्.)

घोरां दुर्गतिमेत्यलीकलवमप्यभ्यर्थितोऽपि ब्रुवन्,
वादे नारदपर्वताख्यसुहृदोर्यद्वद्वसुर्भूपतिः ॥
चक्रेऽर्चाविधुरो विरंचिरनृतात् केतक्यनिष्टा मृषा-
साक्ष्यात्किं न हरिर्भवेन महितःसत्यात्परीक्षाक्षणे॥३

घोरामिति । यः पुरुषः अभ्यर्थितोऽपि याचितोऽपि अली-
कलवं स्तोकमप्यसत्यं ब्रुवन् वदन्सन् घोरां भयानकां दुर्गतिं
प्राप्नोति । यद्वत् यथा वसुर्भूपतिः नारदपर्वताख्यौ एव सुहृदौ त-
योः परस्परं वादे कलहे जाते सति पर्वतमित्रेण प्रार्थितः अलीकम्
वदन्सन् रौद्रां दुर्गतिं नरकगतिं गच्छतिस्म । दृष्टांतमाह । भग-
ईश्वरेण विरंचिर्ब्रह्मा अनृतादलीकभाषणात् अर्चाविधुरः किं न
नः अपितु कृतः । अद्यापि ब्रह्मा लोके न पूज्यते । केतकी मृषा
साक्ष्यात् कूटसाक्षिदानात् ईश्वरेणानिष्टा अवाञ्छनीया किं न कृता
अपि तु कृता । अद्यापि हरमस्तके केतकी न भाति अलीकत्वात् ।
हरिः कृष्णः परीक्षाक्षणे परीक्षाप्रस्तावे सत्यात् सत्यवचनभाषणा-
त् लोके किं न महितश्चक्रे पूज्यो न कारि । अपि तु कृतः । अद्या-
पि कृष्णः पूज्यते सत्यभाषणप्रसादात् ॥ ३५ ॥

अन्य माणसे प्रार्थना कर्या छतां पण जो कोइ प्राणी लेशमात्र पण जूठुं बोले तो ते भयंकर दुर्गति पामे छे. जेम नारद अने पर्वत ए बे मित्रोना विवादमां वसु राजा असत्य बोली दुर्गति पाम्यो. दृष्टांत कहे छे के शुं महादेवे ब्रह्माने जूठुं बोलवाथी अपूज्य कर्या नथी ? केतकीने जूठी साक्षिथी अनिष्ट करी नथी ? अने परीक्षाने अवसरे सत्य वचन बोलवाथी विष्णुने पूज्य कर्या नथी ? अर्थात् कर्या छे. ॥ ३५ ॥

हवे बे श्लोकथी अदत्तादान विरतिद्वार कहे छे

(वसंततिलकावृत्तम्.)

वैराग्यशस्त्रहतमोहतमोऽमलांत–
र्दृष्टयापदिष्टपरिदृष्टहिताहितार्थः ॥
चौरोऽपि शुद्ध्यति शमेन दृढप्रहारी–
वापैति वा दवजवो जलदेन किं न ॥ ३६ ॥

वैराग्येति । चौरोऽपि शमेन क्षान्त्या शुद्ध्यति पापान्मुक्तो भवति । किंरूपश्चौरः । वैराग्यं संसारविरागभावः तदेव शस्त्रं तेन हतं मोहतमः रागांधकारं यस्यात्मा तथा स चासौ अमला निर्मलाऽन्तर्दृष्टिरंतरंगलोचनं तयापदिष्टाः दर्शिताः परिदृष्टाः अवलोकिता हिता आदेया अहिता अनादेया अर्थाः पदार्था येन सः तथा । क इव । दृढप्रहारीव । यथा दृढप्रहारी चौरः शमेन शुद्ध्यति स्म । दृष्टांतमाह । दवजवः दावानलवेगः जलदेन मेघेन किं न अपैति न नाशं याति । अपि तु क्षयं यात्येव ॥ ३६ ॥

वैराग्य रूप शस्त्रथी हणायुं छे मोह रुपी अज्ञान जेनुं एवो पोतनी निर्मल अंतर्दृष्टिथी देखाड्या छे अने जाण्या छे हित अने अहित (उपादेय अने हेय) पदार्थो जेणे एवो चोर पण दृढप्रहारी चोरनी पेठे शमताये करीने शुद्ध थाय छे. दृष्टांत कहे छे के, दावानलनो वेग शुं मेघना जळथी शांत नथी थतो ! अर्थात् थाय छे ३६

नानाकलाविदपि लाघवमेति चौर्या-
द्विद्यानताम्रफलचौर इव प्रियार्थे ॥
दोषो महानधिगुणेऽपि हि लांछनाय,
रत्नाकरे कुजलवच्छशवत् सुधांशौ ॥ ३७॥

नानेति । नानाकलां वेत्तीति ईदृशोऽपि पुरुषः चौर्यातम्करताश्रयणात् लाघवं तुच्छत्वं एति गच्छति । क इव । प्रियार्थे कलत्रार्थे विद्यया नता नम्रीभूताश्च ते आम्राः सहकारास्तेषां फलानि तेषां चौरस्तस्कर इव । दृष्टांतमाह ॥ हि यस्मात् अधिगुणे गुणाधिके पुरुषे महान दोषः लांछनाय कलंकाय स्यात् । कस्मिन्निव कि । रत्नाकरे समुद्रे कुजलवत क्षारजलवत् । यथा समुद्रे क्षारं जलं लांछनाय जातं । पुनः कस्मिन्निव कः । सुधांशौ चंद्रे शशवत् यथा चंद्रे शशः लांछनाय जातः ॥ ३७ ॥

पोतनी प्रियाने अर्थे विद्याना बलथी नमावेला आम्रवृक्षना फलना चोरनी पेठे नाना प्रकारनी कलाने जाणनारो पुरुष पण चोरीना कृत्यथी लघुताने पामे छे. दृष्टांत कहेछे के, अधिक गुणवानने विषे पण म्होटो दोष कलंकने अर्थे थाय छे जेम समुद्रने विषे खारू जल अने चंद्रने विषे हरिण कलंक रूप थया. ॥ ३७ ॥

रूपी लक्ष्मी पण बीजा कोइ उपर आसक्त नहिं थता तेमनीज साथे
मोक्षगति पामी. ॥ ३८ ॥

न ब्रह्मतः सकलशर्मकृतश्चलंति,
धीराः सुदर्शन इव व्यसने घनेऽपि ॥
शेषोऽब्धिवृद्धलहरीचलशैलवल्ग-
द्भूभुग्नमौलिरपि विश्वभरं बिभर्त्ति ॥ ३९ ॥

नेति । धीरा धैर्यवंतःपुरुषाः ब्रह्मतश्चतुर्थव्रतरूपात् मैथुना
सुदर्शन इव घनेऽपि व्यसने कष्टे सति न चलंति चतुर्थव्रतं न त्य
जंतीत्यर्थः । किं रूपाद्ब्रह्मतः । सकलशर्मकृतः सकलसुखकारका
दृष्टांतमाह । शेषः शेषराजः विश्वभरं पृथ्वीभारं बिभर्त्ति । किं ल
क्षणः शेषः । अब्धिः समुद्रः तस्य वृद्धलहरी महाकल्लोलश्रेणिः त
या चलंतः कंपमानाः शैलाः पर्वताः तैर्वल्गनी प्रधाना भूः पृ
थ्वी तया भुग्नो वक्रीभूतो मौलिः किरीटो यस्य स तथा । अं
गीकृतदुःकरमपि धीरा न मुंचंतीत्यर्थः ॥ ३९ ॥

धैर्यवंत पुरुषो गहन दुःखमां आवी पडया छतां पण सुदर्शन
शेठनी पेठे ब्रह्मचर्यव्रतथी चलित थता नथी. दृष्टांत कहे छे के,
समुद्रना म्होटा तरंगोथी कंपता एवा पर्वतोने लीधे भुजवा एवी
पृथ्वीथी नमी गयो छे मुकुट जेनो एवोय पण शेष विश्वना भारने
धारण करे छे ॥ ३९ ॥

हवे बे काव्यथी परिग्रहपरीमाणद्वार कहे छे

विश्वोपकारि धनमल्पमपि प्रशस्यं,

किं नंदवत् फलममानपरिग्रहेण ॥
प्रीत्यै यथा हिमरुचिर्न तथा हिमौघः.
स्याद्वा यथाऽत्र जलदो जलधिस्तथा न॥४०॥

विश्वेति ॥ अल्पमपि स्तोकमपि धनं विश्वोपकारि सर्वलोककार्यसाधकं सत् प्रशस्यं वर्णनीयं भवति । अमानपरिग्रहेण परिग्रहप्रमाणरहितेन नंदवत् नंदभूपतेरिव पुरुषस्य किं फलं. अपि तु न किंचित्फलमित्यर्थः । दृष्टांतमाह । हिमरश्मिश्चंद्रो यथा प्रीत्यै हर्षाय भवति तथा हिमौघो हिमसमूहो न स्यात् । अथवा च पुनः जलदो मेघो यथा प्रीत्यै तथा जलधिः समुद्रो न । एतावता चंद्रमेघौ यथा लघीयांसावपि हर्षाय भवतः तथा हिमसमूहजलधी महांतावपि हर्षाय न स्याताम् ॥ ४८ ॥

थोडुं पण विश्वने उपकार करनारुं धन प्रशंसा करवा योग्य छे परन्तु नंदराजानी पेठे प्रमाण रहित एवा परिग्रहे करीने शुं? अर्थात् कांइ नहीं. दृष्टान्त कहे छे के हिमरश्मि एटले चन्द्र बिंदुमात्र पण लोकोने जेवी प्रीति उत्पन्न करे छे तेवी हिमनो समूह लोकोने प्रीति उत्पन्न करी शकतो नथी. तेमज वर्षा मेघ जेवी प्रीति उत्पन्न करे छे तेवी समुद्र लोकोने प्रीति उत्पन्न करतो नथी. अर्थात् चंद्र अने मेघ नाना छे तो पण ते लोकोने उपकार करनार होवाथी वखणाय छे अने हिम तथा समुद्र बहु मोटा छतां लोकोने उपकार करनार न होवाथी वखणाता नथी ॥

धन्यः परिमितैः सुकृतभाग् न पापी.
प्राङ्गमनो वणिग्निवहादधिकोऽपि ॥

वंद्यः कृतादरजनैर्जगतो मितश्रीः,
पश्याधिकाधिकवसुः शशभृत्कलंकी ॥ ४१ ॥

धन्येति ॥ धन्यो भाग्यवान् पुरुषः परिग्रहमितैः परिग्रह्यमाणैः सुखी स्यात् पापी सपापपुरुषो न । प्राक् पूर्वं सम्मणो वणिक् सम्मणनामा श्रेष्ठी ईश्वरोऽपि कोटीश्वरोऽपि एधहृत् काष्ठहारक आसीत् ॥ दृष्टांतमाह । अहो इत्याश्चर्ये शशभृच्चंद्रः मितश्रीः स्तोकलक्ष्मीकः सन् द्विकलः सन् जगतो विश्वस्य कृतादरं आदरपूर्वकं यथा स्यात्तथा वंद्यो भवति । पश्य विलोकय अधिकं अधिकं वसु कांति र्वा द्रव्यं यस्य स तथा एवंविधश्चंद्र कलंकी स्यात्॥४१॥

भाग्यवंत पुरुष परिग्रहना परिमाणथी सुखी थाय छे. पण कोटी धनवालो छता लाकडाना भारने लावनार सम्मण शेठनी पेठे लोभी पुरूष सुखी नथी. दृष्टांत कहेछे जूओ के चंद्रमा परिमित लक्ष्मीवालो (बीजनो चंद्रमा थोडी कलावालो) होय छे त्यारे लोको तेने आदरथी वंदन करे छे, परंतु ज्यारे तेज चंद्रमा अधिक अधिक किरणवालो थाय छे त्यारे कलंकयुक्त थाय छे॥४१॥

हवे बे काव्ये करीने दिग्विरतिद्वार कहे छे.

सीमस्थिते जलनिधौ निजकालमाने,
शीतातपांभसि च जीवति जीवलोकः ॥
दिग्यानमानमपि जंतुहिताय तद्वत्,
स्याच्चारुदत्तवदिहाप्रयतोऽतिदुःखी ॥ ४२ ॥

विश्वे त्रैलोक्ये सततगतिर्वायुरेकत्रवसतिः एकस्थानककृतावस्थानः कथं स्यात् । अपि तु एकस्थानावस्थायी न स्यात् ॥ दृष्टांतमाह ॥ हरिः श्रीकृष्णः द्रौपद्यर्थे द्रौपद्याः पांडवपत्न्या अर्थे हेतवे अमरकंकापुरं किं नागात् अपि तु जगामैव । कथंभूतःहरिः । आक्रांतजलधिः आक्रांतो जलधिर्येन स तथा समुद्रमुल्लंघ्येत्यर्थः । किं रूपं अमरकंकापुरं । द्वितीयद्वीपः धातकीखंडः तत्रांतर्गतभरतं भरतक्षेत्रांतर्गतं मासं वर्तमानं । एतावता धातकीखंडमध्ये भरतक्षेत्रे अमरकंकानगरं।नारायणो द्रौपद्यानयनार्थं जलधि तीर्त्वा तत्र जगामेति भावः ॥ ४३ ॥

जेणे दिग्विरमण व्रत अंगीकार कर्यु नथी, तेने कोइ पण स्थान जवा योग्य अथवा न जवा योग्य नथी. अथवा तो विश्वने विषे निरंतर गति करनार एवो जे वायु ते एक स्थानके निवास करनारो केवी रीते थाय ? दृष्टांत कहेछेके, श्रीकृष्ण वासुदेव द्रौपदीने अर्थे समुद्रने उल्लंघीने धातकी नामना बीजा खंडमां रहेला भरत क्षेत्रमां अमरकंका नगरी प्रत्ये शुं नहोता गया ? अर्थात् गया हता. ॥ ४३ ॥

हवे बे काव्यथी भोगोपभोगविरमणद्वार कहेछे.

(वसंततिलकावृत्तम.)

भोगोपभोगनियमोऽपि हिताय चेन्न,
स्यात्कंकचूर्ण इव दैवपदप्रदस्तु ॥
प्रीणाति चातकमनन्यगतिं पयोद–

चूताशनैकरसमन्यभृतं वसंतः ॥ ४४ ॥

भोगेति । भोगोपभोगनियमो चेद्यदि शिवाय मोक्षाय न स्यात् । यत्तदोरेकसंबंधः । तर्हि तु पुनः वंकचूल इव देवपदं ददा-तीति तथा देवपदप्रदायको भवत्येव ॥ दृष्टांतमाह ॥ पयोदो मेघ-श्चातकं प्रीणाति संतोषयति । किंभूतं चातकं । अनन्यगतिं न अ-न्यस्मिन् रतिर्यस्येति तथा तं नान्यासक्तमित्यर्थः । वसंतः अन्यभृ-तं कोकिलं प्रीणाति । किंरूपं अन्यभृतं । चूतं सहकारफलं तस्याशने भक्षणे एको रसो यस्य स तथा तं ॥ ४४ ॥

जो भोगोपभोगनो नियम मोक्ष आपनारो थतो नथी तो पण ते वंकचूलने थयो तेम (अन्यजनोने) देवपदवी आपनारो तो थायज छे दृष्टांत कहे छे के. मेघ बीजा कोइ उपर नथी प्रीति जेने एवा चातक पक्षीने संतोष आपे छे अने वसंत, आम्रफल (केरी) ने खावामां प्रीतिवाला कोकिलने संतोष पमाडे छे । ४४ ।

भोगादिलोलुपतया लघुता न शर्म.
श्री ब्रह्मदत्तनरविभकुटुंबवत् स्यात् ॥
पीताधिकेंदुलविलक्षति मीन सिंधुः.
शक्रोऽपि गौतमकलत्ररतश्च शप्तः ॥ ४५ ॥

भोगेति । भोगादेः लोलुपता तया लघुता लघुत्वं स्यात् भ-वति शर्म सुखं न । किंवत् । श्री ब्रह्मदत्तनरपतिः तस्य कु-टुंबानां विभवानां कुटुंबं तद्वत् । दृष्टांतमाह । सिंधुः समुद्रः मी

मर्यादां उज्ञति त्यजति । कथंभूतः सिंधुः । पीता अधिकेंदुरुचिः कांतिर्येन स तथा । शक्रोऽपि इंद्रोऽपि गौतमऋषिकलत्रेऽहल्याया शक्तः सन् शप्तः गौतमेन ऋषिणा सहस्रभगो भवेति शप्तः ॥४५॥

ब्रह्मदत्त चक्रवर्तीना मित्र ब्राह्मणना कुटुंबनी पेठे भोगादिकनी लोलुपताने लीधे माणसने लघुता प्राप्त थाय छे, परंतु सुख थतु नथी. दृष्टांत कहेछे. समुद्रे चंद्रमानी कलानुं पान कर्युं तो ते मर्यादानो त्याग करे छे अने इंद्र, गौतम ऋषिना स्त्रीने विषे आसक्त थयो तो तेने शाप मल्यो छे. ॥ ४५ ॥

हवे वे काव्यथी अनर्थदंडविरमणद्वार कहे छे.

नानर्थदंडमघदं दधते महांत,
एकेषुमात्रविजयीव स चेटभूपः ॥
लोकस्य जाड्यहृतये तरणेः प्रभान्हि,
तापच्छिदे च शशिनो निशि नो तदर्त्यै ॥४६॥

नानर्थेति । महांतः सत्पुरुषाः अघदं पापदायकं अनर्थदंडं न दधते न धारयंति । स प्रसिद्धः चेटभूपतिः चेटकनृपः एकेषुमात्र विजयी एकेन इषुमात्रेण बाणमात्रेण विजयत इत्येवं शीलः स इव । दृष्टांतावाह । तरणेः प्रभा सूर्यस्य कांतिः अन्हि दिवसे जाड्यहृतये शीतापनोदाय भवति । च पुनः शशिनश्चंद्रस्य प्रभा निशि रात्रौ तापच्छिदे भवति । तदर्त्यै लोकपीडायै न भवति किं तु लोकानां हर्षायैव भवति ॥ ४६ ॥

अष्टापद प्राणी अने दरेक पर्वतपर दंतप्रहार करतो एवो हाथी ए बन्ने जणानुं शरीर शुं भांगी जतुं नथी? अर्थात् भांगी जाय छे ॥४७॥

हवे बे काव्यथी सामायिकद्वार कहे छे.

सामायिकं द्विघटिकं चिरकर्मभेदि,
चंद्रावतंसकवदुच्चधियोऽत्र किं तु ॥
स्पर्शेऽपि सत्यमुदकं मलिनत्वनाशि,
घोरं तमो हरति वा कृत एव दीपः ॥४८॥

सामायिकमिति । द्वेघटिके अवधिर्यत्र तत् द्विघटिकं सामायिकं चिरकर्मभेदि चिरकालोपार्जितानि कर्माणि भिन्नतीति चिरकर्मभेदि स्यात् । क इव । चंद्रावतंसकराजवत् । तु पुनः अत्र सामायिके उच्चा उत्कृष्टधीर्यस्य स उच्चधीः तस्य उच्चधियः पुरुषस्येव किं । दृष्टांतावाह । उदकं जलं स्पर्शेऽपि सत्यं मलिनत्वनाशि मलिनत्वनाशकं भवति ॥ वा अथवा कृत एव दीपः घोरं रौद्रं शूचिभेद्यं निबिडं तमोंधकारं हरति स्फेटयति ॥ ४८ ॥

चंद्रावतंसक राजानी पेठे बे घडी पालेलुं सामायिक पण लांबा वखतना कर्मनो नाश करे छे, तो पछी ए सामायिक उच्च बुद्धि वाला पुरुषना कर्मने नाश करे तेनी तो वातज शी करवी? ए वात सत्य छे. जल फक्त स्पर्शथीज मलिनतानो नाश करे छे अने प्रगट थयेलो दीवो तुरत घोर अंधकारनो नाश करे छे. ॥४८॥

सामायिकं समतयारिसुहृत्सुसिद्ध्यै,

प्रद्योतमुक्तिकृदुदायिनराजवत् स्यात् ॥
सच्चंदनांशुकमिवास्फुटकुष्टभाज-
स्तत्कुर्वतः कपटतो वहिरंगशुद्ध्यै ॥ ४९ ॥

सामायिकमिति । अरिसुहृत्सु समतया शत्रुमित्रेषु समभावेन सामायिकं सिद्ध्यै मुक्त्यै भवति । किंवत् । प्रद्योतमुक्तिकृदुदायिनराजवत् चंडप्रद्योतमुक्तकारिणः उदायनराजस्येव । दृष्टांतमाह । तत्सामायिकं कपटतोऽपि छद्मनोऽपि कुर्वतः पुरुषस्य वहिरंगशुद्ध्यै शरीरनैर्मल्याय भवति । किमिव । अस्फुटकुष्टभाजः पुरुषस्य सच्चंदनांशुकमिव । यथा सच्चंदनं गोशीर्षचंदनं अंशुकं वस्त्रं वा वहिरंगशुद्ध्यै भवति । तथैव सामायिकं स्यादिति ॥ ४९ ॥

शत्रु अने मित्रने विषे समभाव राखीने सामायिक कर्युं होय तो ते, प्रद्योतन राजाने छोडी मूकनारा उदायन राजाने थयुं तेम मुक्तिने अर्थे थाय छे परंतु जो ते कपटथी कर्युं होय तो पण ते जेने कोढनो रोग स्पष्ट प्रगट थयो नथी एवा माणसे चंदननो लेप तथा वस्त्र ओढाडवानी पेठे फक्त बहारनी अंग शुद्धिने अर्थे थाय छे ॥ ४९ ॥

हवे बे काव्यथी देशावकाशिकाधिकार कहे छे

देशावकाशिकमपास्य सकाकजंघ-
कोकाशवद्विपदमेति जनः प्रमादी ॥
धत्ते प्रभां दिनकरो न निशाकरोऽपि.
न स्तूयतेऽपि च पयोभृदकालवृष्टः ॥ ५० ॥

देशेति। जनः मनुष्यः देशावकाशिकं अपास्य त्यक्त्वा विपदं एति गच्छति । कथंभूतः जनः । प्रमादी प्रमत्तः । किंवत् । मका कजंघकोकाशवत् काकजंघनृपसहितकोकाशसूत्रधारवत् । अत्र लौकिकदृष्टांतावाह । निशाकरश्चंद्रो दिनचरो दिवसे उदितः सन् द्युति न धत्ते न धारयति । च पुनः पयोभृन्मेघोऽकाले वृष्टः सन् लोकैर्न स्तूयते ॥ ५० ॥

प्रमादी माणस, देशावकाशिकव्रतने त्यजी दइने काकजंघ रा जा अने कोकाश सुथारनी पेठे विपत्ति पामे छे. दृष्टांत कहे छे के, दिवसे उदय पामेलो चंद्र कांतिने धारण करतो नथी अने अकाले वरसेलो मेघ लोकोथी वखणातो नथी. ॥ ५० ॥

(मालिनीवृत्तम्.)

गुरुवचनवियोगाज्ञातदेशावकाशो,
विपदि तरति पुण्याच्चेद्यथा लोहजंघः ॥
हयमयवृषभा वा स्वामिना वाह्यमानाः,
सततममितगत्या किं हितं स्वस्य कुर्युः॥५१॥

गुरुवचनेति । चेद्यदि पुण्यं स्यात्तर्हि विपदि आपदि पतितः सन् पुण्यात्तरति । कस्तरति । जीवः । कथंभूतो जीवस्तरतीत्या शंक्याह । गुरोर्वचनं तस्य वियोगस्तस्मात् आचार्यवचनराहित्यात् न ज्ञातं देशावकाशिकं व्रतं येन स तथा । क इव । लोहजंघो यथा । लोहजंघनामा लेखहारको गुरुवचनासंयोगात् अज्ञातदेशा

चकारस्वरूपः पुण्याद्धर्मादेव आपदि सत्यं तरतिस्म तीर्णवान् कष्टमिति शेषः । दृष्टांतमाह । इयमयत्रपभाः अश्वोष्ट्रकुकुद्मंतः स्वामिना धनिकेन सततं निरंतरं अमितगत्या अप्रमाणगमनेन वाह्यमानाः खेड्यमानाः संतः स्वस्य आत्मनः हितं किं कुर्युः । अपि तु आत्मनः किमपि हितं धर्मं न कुर्वंति ॥ ५१ ॥

गुरुनां वचनना वियोगने लीधे नथी जाण्युं देशावकाशिक व्रत जेणे एवो पुरुष विपत्तिने विषे पड्या छतां पण लोहजंघनी पेठे पुण्यथी कष्टने तरे छे दृष्टांत कहे छे के स्वामीए निरंतर अप्रमाण गतिवडे वहन करेला अश्व उंट अने बलद शुं पोतानुं हित करे ? अर्थात् नज करे ॥ ५१ ॥

हवे बे काव्यथी पौषधव्रतद्वार कहे छे.

(वृत्तम)

शुचिपौषधेन मुनितुल्यतेति किं.
जिनतापि मेघरथवत् क्रमात् ॥
किमु निर्धनस्य मणिनेष्टदायिना.
धनितुल्यतैव नृपतुल्यता न किम् ॥ ५२ ॥

शुचीति । शुचिपौषधेन निर्मलपौषधव्रतेन मुनितुल्यता मुनिसादृश्यं भवतीति किं परं क्रमादनुक्रमेण जिनतापि तीर्थंकरत्वमपि स्यात् । किंवत् । मेघरथवत् । यथा मेघरथः श्री शांतिनाथजीवः [illegible] शुचिपौषधेन तीर्थंकर[illegible] अभूत् । दृष्टांतमाह । निर्धनस्य पुरुषस्य [illegible]

चिंतामणिना धनितुल्यता लक्ष्मीनस्मादृशं स्यादेव इति किं नाथ नृपतुल्यता किं न स्यादपि तु भूपतिसादृश्यमपि भूयादिति ॥५२॥

पवित्र एवा पौषध व्रते करीने गृहस्थने पण मुनिनी तुल्यता प्राप्त थाय छे तेमां शुं नवाइ? परंतु ते पौषधव्रतथी अनुक्रमे मोक्षपथनी पेठे तीर्थंकर पद पण प्राप्त थाय छे. दृष्टांत कहे छे के, निर्धन पुरुषने, इच्छित अर्थ आपनारा चिंतामणिरत्नथी शुं धनवाननी तुल्यता थाय छे अने राजानी तुल्यता शुं नथी थती? ॥५२॥

(वसंततिलकावृत्तम.)

सत्पौषधं विविधसिद्धिदमौषधं य-

त्तद्भावनाशमरसार्द्रहृदग्निलीढः ॥

स्वः सागरेंदुरजनि स्फुटहेममूर्ति-

रौर्वाग्नितप्तविमलोऽद्रिरिवाब्धिमंथाः ॥५३॥

सत्पौषधमिति ॥ यत् सत्पौषधं विविधसिद्धिदमौषधं वर्तते तत्तस्य पौषधस्य भावना तत्र शमरूपो रसश्च समरसस्तेन आर्द्रं कठोरं हृत् हृदयं तदेवाग्निस्तेन लीढः अस्वादितः सन् स स्वः स्वर्गे स्फुटहेममूर्ति प्रकटसुवर्णदेहोऽजनि जातः । अन्यदपि वस्तु भावनया सुवर्णसिद्धिदायकरससंयोगेन अग्निना लीढं हेम भवति । यथा अब्धिमंथाः अद्रिर्मेरुपर्वतः और्वाग्नितप्तो वाडवानलतप्तो अतएव विमलो निर्मलो जातः ॥ ५३ ॥

विविध सिद्धिने आपवामां औषधरूप जे पौषधव्रत छे तेनी

भावनामां समतारूप रसे करीने मिश्रायलुं जे हृदय ते रूप अ-ग्निथी स्पर्शित थयेलो सागरचंद्र राजा. वाडवानल अग्निना तापथी निर्मल थयेला मेरु पर्वतनी पेठे स्फुट सुवर्ण समान देह छे जेनो एवो छतो स्वर्गने विषे गयो छे. ॥ ५३ ॥

हवे बे काव्यथी अतिथीसंविभागद्वार कहे छे

(मालिनीवृत्तम्)

किमपि फलमपूर्वं संविभागस्य साधो-
र्यदभिलषितसिद्ध्यै मूलदेवेऽपि माषाः ॥
कणमपि हि सुपात्रे न्यस्तमुच्चैः फलर्द्ध्यै.
ननु तृणमपि धेनोर्दुग्धपीयूषवृष्ट्यै ॥ ५४ ॥

किमपीति । साधोः मुनिराजस्य संविभागस्य पात्रदानस्य फलं किमपि अपूर्वं भवति । यदस्मात् मूलदेवे माषा अपि अभिल-षितसिद्ध्यै मनोवाञ्छितसिद्ध्येऽभूवन् । माषाः कुल्माषाः दत्ताः सन्त इति शेषः । हि निश्चितं कणमपि स्तोकमपि पात्रे न्यस्तं सत् उच्चैः फलर्द्ध्यै उत्कृष्टफलसमृद्धये भवति । दृष्टान्तमाह । ननु निश्चितं धेनोः तृणमपि न्यस्तं सत् दुग्धपीयूषवृष्ट्यै दुग्धामृतवर्ष-णाय भवति । स्तोकं सुपात्रे दीयते बहुफलं लभ्यते इति भावः ॥ ५४ ॥

मुनिराजने पात्रदाननुं कांइ अपूर्व फल छे. जेमके साधु मु-निराजने वहोरावेला माष अडद-पण मूलदेवने इच्छितवस्तुनी सि-द्धि आपनारा थया छे. निश्चे थोडुं पण सुपात्रने विषे आपेलुं हो-य तो ते उत्कृष्ट फलनी सिद्धिने माटे थाय छे. दृष्टांत कहे छे के गायने आपेलुं घास पण दुध रूप अमृतनी वृष्टिने माटे थाय छे.

यदसदपि ददौ प्राक् शालिभद्रोऽतिथेः स्वं,
तदसदपि स लेभे क्वामरर्द्धिः क्व मर्त्यः ॥
क्व भुवि जलधिरिंदुः क्वांवरे तं स पुष्णा-
त्यमृतभृतपयोदं शोषणेऽप्यौर्ववन्हेः ॥ ५५ ॥

यदिति । शालिभद्रः अतिथेः मुनिराजस्य स्वं यत् असदपि अविद्यमानमपि परमान्नरूपं प्राक् पूर्वजन्मनि ददौ दत्तवान् । तत्तस्मात् स शालिभद्रः असदपि मर्त्यलोके अविद्यमानमपि लेभे प्राप्तवान् । सुखमितिशेषः । अन्यथा अमरर्द्धिः क्व देवसमृद्धिः क्व मर्त्यः क्व मनुष्यः क्व । दृष्टांतमाह । भूवि पृथिव्यां जलधिः समुद्रः क्व अंवरे आकाशे इंदुश्चंद्रः क्व । स इंदुः तं जलधिं पुष्णाति वृद्धिं नयति । किंरूपं तं समुद्रं । औंर्ववन्हेः शोषणेऽपि अमृतभृतपयोदं । अमृतेन पानीयेन भृतः पोषितः पयोदो मेघो येन स तथा तं अमृतभृतपयोदं ॥ ५५ ॥

पूर्वभवे शालिभद्रे, जे परमान्न रुप पोतानी वस्तु नहिं छतां पण मुनिराजने वहोरावी, तेथी तेणे मनुष्यलोकमां नहि मली शके तेवुं सुख प्राप्त करयुं. नहिं तो देवसमृद्धि क्यां अने मनुष्यपणु क्यां ? दृष्टांत कहे छे के, समुद्र पृथ्वी उपर छे अने चंद्रमा आकाशमां छे तो पण ते चंद्रमा, वडवानल अग्निथी शोषण थया छतां पण जलवडे मेघनी पुष्टी करनारा समुद्रनुं पोषण करेछे.॥५५॥

हवे वे काव्यथी सात क्षेत्रद्वार कहे छे.

(इन्द्रवंशावृत्तम्.)

क्षेत्रेषुसप्तस्वपि पुण्यवृद्धये,

वपेद्धनं संप्रतिराजवद्धनी ॥
कृषीवलः केवलशालितंदुलान्,
वपेत्स किं योऽखिलसस्यलालसः ॥ ५६ ॥

क्षेत्रेष्विति । धनी लक्ष्मीवान् पुरुषः पुण्यवृद्धये धर्मपोषणाय जैनभुवनादिषु सप्तसु क्षेत्रेषु धनं द्रव्यं वपेत् । किंवत् । संप्रतिराजवत् । दृष्टांतमाह । यः कृषीवलः कर्षुकः अखिलसस्यलालसः सकलधान्यरसिको भवति सः कृषीवलः केवलशालितंदुलान् किं वपेत् ? अपि तु अन्यान्यपि धान्यानि वपतीत्यर्थः ॥ ५६ ॥

धनवान माणसे संप्रति राजानी पेठे पुण्यनी वृद्धिने अर्थे साते क्षेत्रोमां धन वावनुं. दृष्टांत कहे छे के सर्व प्रकारना धान्यनी इच्छावालो खेडुत शुं फक्त शालना चोखानेज वावे ? अर्थात् सर्व धान्यने वावे छे ॥ ५६ ॥

(इन्द्रवज्राछन्द.)

क्षेत्राणि सप्तापि फलंति सर्व-
मप्येककं कलिकवत् सुपुष्टम् ॥
यत्पुष्यमाणानि कलत्रदीपै-
रेकैनतत्संगलदीपकेन ॥ ५७ ॥

क्षेत्राणीति । सप्तापि क्षेत्राणि सर्वं फलंति । एवं एकक-मपि सुदृढं सुहृत्स्नेहं सत् सर्वं फलति । किंवत् । कलिकवत् क-

लिकपुत्रवत् । दृष्टांतमाह । आरात्तिकसप्तदीपैर्यत्पुण्यं भवति त
त्पुण्यं एकेन मंगलदीपकेन भवति ॥ ५७ ॥

सातें क्षेत्रो तो सर्व प्रकारना फलदायी थाय, परंतु सारीरी
ते सेवन करेलुं एक क्षेत्र पण कल्किपुत्रने थयुं तेम सर्व प्रकारना
फल आपनारुं थाय छे. दृष्टांत कहे छे के, आरतीना सात दीवा
थी जे पुण्य थाय छे ते पुण्य एक मंगल दीवाथी पण थाय छे.॥५७॥

हवे बे काव्यथी जिनबिंबद्वार कहे छे.

(वसंततिलकावृत्तम्.)

बिंबं महल्लघु च कारितमत्र विद्यु-
न्माल्यादिवत् परभवेऽपि शुभाय जैनम् ॥
ध्यातुर्गुरुर्लघुरपीप्सितदायिमंत्रः,
प्राग्दौस्थ्यभाविघनविघ्नभिदे न किं स्यात् ॥५८॥

बिंबमिति । अत्र इहलोके जैनं बिंबं महल्लघु च कारितं सत्
परभवेऽपि शुभाय श्रेयसे भवति । किंवत् । विद्युन्माल्यादिवत् ।
दृष्टांतमाह । ईप्सितदायिमंत्रः मनोवांछितदायको मंत्रः ध्यातुः पु
रुषस्य प्राक् पुरातनं दौस्थ्यं दरिद्रता तेन भवतीति एवंविधं घनं
निबिडं विघ्नं अंतरायः तस्य भिदे छेदनाय किं न स्यात् अपि तु
पुरातनं दौस्थ्यविघ्नं स्फेटयत्येव मंत्रः । कथंभूतः मंत्रः । गुरुर्बृहत्
लघुः बह्वक्षरो वा अल्पाक्षरः ॥ ५८ ॥

आ लोकमां एक पण मोटुं के न्हानुं जिनबिंब कराव्युं होय
. ते विद्युन्मालिने थयुं तेम परभवने विषे पण श्रेयने माटे थाय

जेम अभयकुमारे पोताने तथा मोहांधकारमां रहेला आर्द्रकुमारने निर्मल कर्यो तेम पोताना तथा परना आत्माने निर्मल करे छे. दृष्टांत कहे छे के, कल्याणनी लक्ष्मीना स्थानकरूप एवो जे दीपक ते कोना हर्षने पुष्ट करतो नथी ? ॥ ५९ ॥

हवे बे काव्यथी चैत्यद्वार कहे छे.

(वसंततिलकावृत्तम्.)

तीर्थं मुदे स्वपरयोरपि कीर्तिपाल-
भूपालकारिततुरंगमबोधवत् स्यात् ॥
उद्यानसारसहकारवनं फलर्द्ध्यै,
किं वप्तुरेव न पुनस्तदुपासकानाम् ॥ ६० ॥

तीर्थमिति । तीर्थं चैत्यं स्वपरयोरपि मुदे हर्षाय स्यात् । किंवत् । कीर्तिपालभूपालकारिततुरंगमबोधवत् कीर्तिपालनृपेण कारिताश्वावबोधकतीर्थवत् तद्भृगुक्षेत्रे प्रसिद्धं । दृष्टांतमाह । उद्यानसारं यत् सहकारवनं तत् किं वप्तुरेव निजारोपकस्यैव फलर्द्ध्यै भवति पुनस्तदुपासकानां तत्सेवकानां फलर्द्ध्यै न भवति । अपि तु वप्तुस्तत्सेवकानामपि च फलसमृद्धये भवति ॥ ६० ॥

कीर्तिपाल राजाए भृगुक्षेत्रने विषे करावेला अश्वावबोधक चैत्यनी पेठे सर्वे चैत्यो, बनावनारने तथा बीजाओने हर्ष उत्पन्न करे छे. दृष्टांत कहे छे के उत्तम आम्रवृक्षोनुं वन, शुं तेना वावनारनेज फलसिद्धि आपे छे अने सेवनारने नथी आपतुं ? अर्थात् बन्नेने आपे छे.

चित्तं स्थिरं सुकृतकीर्तिकरं च वास्तु-

ज्ञानमिति। ज्ञानं चतुर्दशपूर्वरूपं गजागमनादिरूपं अन्योपका-
रकारि वर्तते। एतादृशं ज्ञानं यः पुरुषः पुनरधीते पठति
कं कृत्वा। इतरशास्त्रपाठैः अन्यग्रंथपठनैः। किंभूतः पुरुषः
ज्ञोऽपि विद्वानपि। क इव। आर्यरक्षित इव। यथार्यरक्षि-
तः ज्ञोऽपि विद्वानपि अन्यशास्त्रपठनैः कृत्वा ज्ञानं अधीतवान् त-
थान्योऽपि ज्ञानं अधीते। दृष्टान्तमाह। ये पुरुषाः स्वर्णधिया कन-
कसदृशा ये काचास्तेषु कृतादराः स्युस्ते पुरुषाः सत्यमेव हेम सुवर्ण-
मधिगत्य प्राप्य किमु त्यजंति? अपि तु न त्यजंति गृह्णन्त्येव ॥

आर्यरक्षितनी पेठे अन्यशास्त्रनो अभ्यास करीने विद्वान् थये-
लो एवो पण पुरुष, अण लोकने हितकारी एवा ज्ञाननो फरी अ-
भ्यास करे छे. दृष्टांत कहे छे के जे पुरुषोए सुवर्ण सरखा का-
चना ककडाने सुवर्ण मान्यु छे, तेओ साचा सुवर्णने प्राप्त करी
पछी शुं तेने त्यजीदे खरा? अर्थात् न त्यजी दे. ॥ ६२ ॥

(मालिनीवृत्तम्.)

पठ पठति यतस्वान्नादिना लेखय स्वैः,
स्मर वितर च साधौ ज्ञानमेतद्धि तत्वम् ॥
श्रुतलवमपि पुत्रे पश्य शय्यंभवोऽदा-
ज्जगति हि न सुधायाः पानतः पेयमन्यत् ॥ ६३ ॥

पठेति। पठ ज्ञानं ज्ञानं भण। पठति पुरुषेऽन्नादिना भो-
जनादिना यतस्व यत्नं कुरु। स्वैर्द्रव्यैर्लेखय ज्ञानं। ज्ञानं स्मर

स्मरणं कुरु । च साधौ मुनौ ज्ञानं वितर विस्तारय । हि निश्चितं एतत्तत्त्वं । पश्य विलोकय । शय्यंभवः पुत्रे मणके श्रुतलवमपि अदात् ददौ । दृष्टांतमाह । हि यस्मात्सुधायाः पानतः अमृतपानतः जगति अन्यत् पेयं न नास्ति ॥ ६३ ॥

तमे पोते ज्ञाननो अभ्यास करो अने अभ्यास करनाराओने अ-शनादिकवडे सहाय करो द्रव्यथी ज्ञान लखावो. ते ज्ञाननुं स्मरण करो अने ते साधुओने आपो. कारण के एज तत्त्व छे जुओ श-य्यंभव मुनिए पोताना पुत्र मणकने अल्प ज्ञान पण आप्युं. दृष्टांत कहे छे के आ जगतमां अमृतना पानथी बीजुं कांइ अधिक पान करवा लायक नथी ॥ ६३ ॥

हवे बे काव्यथी संघद्वार कहे छे

(शार्दूलविक्रीडितवृत्तम.)

लोकेभ्यो नृपतिस्ततोऽपि हि वरश्चक्री ततो वासवः,
सर्वेभ्योऽपि जिनेश्वरः समधिको विश्वत्रयीनायकः॥
सोऽपि ज्ञानमहोदधिः प्रतिदिनं संघं नमस्यत्यहो,
वैरस्वामिवदुन्नतिं नयति तं यः स प्रशस्यः क्षितौ ६४

लोकेभ्य इति । लोकेभ्यो नृपतिर्विशेषः श्रेष्ठः ततोऽपि नृपति-भ्योऽपि हि चक्री वरः प्रधानः ततश्चक्रवर्तिभ्यो वासव इंद्रो वरः प्रधानः सर्वेभ्योऽपि जिनेश्वरः समधिकः उत्कृष्टः । कथंभूतः जिनेश्वरः । विश्वत्रयीनायकः लोकत्रयाधिपतिः । सोऽपि सर्वो

स्मरणं कुरु । च साधौ मुनौ ज्ञानं वितर विस्तारय । हि निश्चितं एतत्तत्वं । पश्य विलोकय । शय्यंभवः पुत्रे मणके श्रुतलवमपि अदात् ददौ । दृष्टांतमाह । हि दस्मात्सुधायाः पानतः अमृतपानतः जगति अन्यत् पेयं न नास्ति ॥ ६३ ॥

तमे पोते ज्ञाननो अभ्यास करो अने अभ्यास करनाराओने भ-क्तादिकवडे सहाय करो. द्रव्यथी ज्ञान लखावो. ते ज्ञाननुं स्मरण करो अने ते साधुओने आपो. कारण के, एज तत्व छे. जुओ श-य्यंभव मुनिये पोताना पुत्र मणकने अल्प ज्ञान पण आप्युं. दृष्टांत कहे छे के आ जगत्मां अमृतना पानथी बीजुं कांइ अधिक पान करवा लायक नथी. ॥ ६३ ॥

हवे बे काव्यथी संघद्वार कहे छे.

(शार्दूलविक्रीडितवृत्तम्.)

लोकेभ्यो नृपतिस्ततोऽपि हि वरश्चक्री ततो वासवः.
सर्वेभ्योऽपि जिनेश्वरः समधिको विश्वत्रयीनायकः॥
सोऽपि ज्ञानमहोदधिः प्रतिदिनं संघं नमस्यत्यहो.
वैरस्वामिवदुन्नतिं नयति तं यः स प्रशस्यः क्षितौ ६४

लोकेभ्य इति । लोकेभ्यो नृपतिर्वरः श्रेष्ठः ततोऽपि नृपति-भ्योऽपि हि चक्री वरः प्रधानः ततश्चक्रवर्तिभ्यो वासव इंद्रो वरः प्रधानः सर्वेभ्योऽपि जिनेश्वरः समधिकः उत्कृष्टतरः । स्वयंभूतः जिनेश्वरः । विश्वत्रयीनायकः लोकत्रयाधिश्वरः । सोऽपि सर्वेषां

ज्ञानमहोदधिर्ज्ञानसमुद्रः प्रतिदिनमहर्निशं संघं चतुर्विधं अहो इ त्याश्चर्ये नमस्यति नमस्करोति । यः पुरुषो वैरस्वामिवत्तं संघं उन्नतिं नयति स पुरुषः क्षितौ पृथिव्यां प्रशस्यो वर्णनीयः ॥६४॥

सर्वे लोकोथी राजा श्रेष्ट छे, राजाथी चक्रवर्ती अने चक्रव र्तीथी इंद्र श्रेष्ट छे. वली ए सर्वथी त्रण जगत्ना नायक एवा जि नेश्वर श्रेष्ट छे. आश्चर्य छे के, ज्ञानना महासागर ते जिनेश्वर पण श्री संघने प्रतिदिन नमस्कार करे छे. माटे ते संघने जे पुरुष वैर स्वामीनो पेठे उन्नति पमाडे छे, तेने धन्य छे. ॥ ६४ ॥

कोऽप्यन्यो महिमास्त्यहो भगवतः संघस्य यस्य स्फुर-
त्कायोत्सर्गबलेन शासनसुरी सीमंधरस्वामिनम् ॥
नित्वा तत्कृतदोषशुद्धिमुदितां यक्षार्यिकां चानयत् ,
किं चैतन्ननु तत्प्रभावविभवैस्तीर्थंकरत्वं भवेत् ॥६५॥

कोऽप्यन्य इति । भगवतः संघस्य कोऽप्यन्यो महिमा प्रभा वोऽस्ति । अहो इत्याश्चर्ये यस्य संघस्य स्फुरत्कायोत्सर्गबलेन शा सनसुरी शासनदेवता यक्षार्यिकां यक्षासाध्वी श्री सिमंधरस्वामि नं नीत्वा च पुनः पश्चादानयत् ॥ किंभूतां यक्षार्यिकां । तत्कृत दोषशुद्धिमुदितां तेन कृतया सीमंधरस्वामिना कृतया दोषशुद्ध्या दोषाभावेन मुदितां हृष्टां । च पुनरेतत् किं । ननु निश्चिते तत्प्र भावविभवैः संघप्रभावमहिमाभिः तीर्थंकरत्वं जिनत्वं भवेत् स्यात्.

अहो! ए समर्थ एवा संघनो कोइ नवीनज महिमा देखाय छे! कारण के, ए संघना कायोत्सर्ग वले करीने शासनदेवी यक्षा

साध्वीने श्रीसीमंधर स्वामी पासे लेइ गइ अने त्यां सीमंधरस्वामीए तेनी (यक्षासाध्वीनी) करेली दोष शुद्धिथी हर्ष पामेली ते यक्षासाध्वीने पाछी लइ आवी माटे खरेखर ए संघना आवा प्रभावना विभवथी तीर्थंकरपणुं थाय छे ॥ ६५ ॥

हवे बे काव्यथी साधुद्वार कहे छे.

(मालिनीवृत्तम्)

भवति हि भवपारः शुद्धया साधुभक्त्या.
धनगृहपतिजीवानंदवैद्येशवत् प्राक् ॥
पृथुरपि हि पयोधिस्तीर्यते चारुतर्या,
तिमिरतरभृतोऽध्वा दीप्रया दीपयष्ट्या ॥६६॥

भवतीति । शुद्धया निर्मलया साधुभक्त्या मुनिसेवया हि निश्चितं भवपारो भवति संसारसमुद्रतरणं स्यात् । किंवत् । प्राक् पूर्वं धनगृहपतिजीवानंदवैद्येशवत् धननामा गृहपतिः श्रेष्ठी जीवानंदनामा च वैद्येशो वैद्यराजस्तयोर्द्वयोः पूर्वजन्मनि मुनिरोगनिराकरणरूपया भक्त्या भवपारोऽभूत् । दृष्टांतमाह । पृथुरपि विस्तीर्णोऽपि पयोधिः समुद्रः चारुतर्या प्रधाननौविशेषेण तीर्यते पारः प्राप्यते । दीप्रया देदीप्यमानया दीपयष्ट्याऽध्वा तीर्यते । किंभूतोऽध्वा । तिमिरतरभृतः अंधकारसमूहपूर्णः ॥ ६६ ॥

शुद्ध साधुभक्तिथी धनसार्थवाहनी पेठे तथा जीवानंद वैद्यनी पेठे संसारनो पार पमाय छे ते दृष्टांते करे छे छे. म्होटो पण

पण समुद्र मनोहर वहाणथी तराय छे अने प्रकाशीत एवा दीवाए करीने अंधकारमय रस्ते जइ शकाय छे. ॥ ६६ ॥

(शार्दूलविक्रीडितवृत्तम्.)

दानैः प्रासुकभक्तपानवसनावासौषधानां मुने-
वैयावृत्यकृतेश्च विस्मयकरा भोगा बलं चाप्यते ॥
श्रीमद्बाहुसुबाहुवत्परभवे सा कामगव्यप्यहो,
सच्चारीजलदानकोमलकरस्पर्शैरलं तुष्यति ॥६७॥

दानैरिति। मुनेः साधोः प्रासुकभक्तपानवसनावासौषधाना मि दोषभक्तपानवस्त्रनिवासभेषजानां दानैर्वितरणैः कृत्वा भोगाः प्राप्यते। कथंभूताः भोगाः। विस्मयकराः आश्चर्यकारकाः ॥ च पुनः मुनेः साधोः वैयावृत्यकृतेः सेवाकरणात् बलं प्राप्यते । किंवत् । परभवे श्री बाहुसुबाहुवत् । यथा पश्चाद्भवे श्री बाहुः प्रासुकभक्तपानवसनवासौषधानां दानैः कृत्वा भरतचक्रवर्तिभवे चक्रवर्ति भोगान् लेभे । सुबाहुश्च मुनेर्वैयावृत्यं विश्रामणादिकं चक्रे तेन स पश्चात् बाहुबलिभवे तादृशं बलं लेभे । येन बलेन भरतचक्रवर्तिनमपि जिगाय । दृष्टांतमाह । अहो इत्याश्चर्ये सा कामगव्यपि अलमतिशयेन तुष्यति हृष्टा भवति । कैः कृत्वा हृष्टा भवतीत्याह । सच्चारीजलदानकोमलकरस्पर्शैः प्रधानतृणपानियदानसुकोमलहस्तकंडुयनैः । एतैः प्रकारैः तुष्यति ॥ ६७ ॥

प्रासुक अन्नपाणी, वस्त्र, निवास अने औषध ए सर्व मुनिने

क्तिने माटे थाय छे. जूओ! श्री ऋषभप्रभुनी पुत्री ब्राह्मी बाहुबलिनी मुक्तिने माटे थइ. तेमज पुष्पचूला अन्निकापुत्रनी मुक्तिने माटे थइ वली मृगावती श्रीचंदनबालानी मुक्तिने माटे शुं नथी थइ? अर्थात् ते पण तेनी मुक्तिने माटेज थइ छे. ॥ ६८ ॥

किं पूज्या श्रमणी न सा श्रुतरसा दुर्बोधहृन्मोहहृत्,
मात्रासक्तकुबेरदत्तदयिता साध्वीव जातावधिः ॥
धन्या एव चिरंतना व्रतधना अप्याधुनिक्यः शुभा,
याकिन्या हरिभद्रवादिमुकुटः सोऽबोधिवाङ्मात्रतः ६९

किमिति। सा श्रमणी साध्वी कि पूज्या न अपि तु पूज्यैव। सा का। या श्रुतरसा भवति श्रुते सिद्धांते रस आदरो यस्याः सा तथा। पुनः किंभूता। दुर्बोधहृत् कुत्सितज्ञानहर्त्री। मोहोऽज्ञानं तं हरतीति मोहहृत्। केव। मातरि आसक्तस्य कुबेरदत्तस्य दयिता कुबेरदत्तदयिता कुबेरदत्ता साध्वीव। यथा सा तस्य कुत्सितज्ञानहारिणी मोहहरी वाऽभूत्। कि भूता कुबेरदत्तदयिता जातोऽवधिर्यस्या सा जातावधिः। चिरंतनाः प्राचिना। व्रत एव धनं यस्या सा व्रतधना महासत्यो धन्या एव। आधुनिक्योऽपि महासत्यः शुभा। दृष्टांतमाह। याकिन्या महत्तर्या हरिभद्रो नाम ब्राह्मणो वादींद्राणां मुकुटः श्रेष्टः सोऽबोधि प्रतिबोधितः। कस्मात् वाङ्मात्रतः। "चक्किदुगं हरिपणगं चक्किणकेसवो चक्की" इत्यादि वचनमात्रतः पश्चाद्धरिभद्राचार्यो जातः ॥ ६९ ॥

मानाने विषे आसक्त एवा कुबेरदत्तनी स्त्री कुबेरदत्ता के जेने अवधिज्ञान उत्पन्न थयुं हतुं ते साध्वीनी पेठे शास्त्रमां प्रीतिवाली,

दुष्ट बोधने हरण करनारी अने अज्ञानने दूर करनारी साध्वी शुं पूज्य नथी? अर्थात् पूज्य छे पूर्वकालनी साध्वीओने तो धन्य छे. परंतु आधुनिक कालनी साध्वीओ पण कल्याणकारी छे जूओ याकिनी नामनी साध्वीये वादी शिरोमणी एवा हरिभद्रसूरिने केवल वचनमात्रे करीने बोध पमाड्यो हतो. ॥ ६९ ॥

हवे ये काव्यथी श्रावकद्वार कहे छे.

(मालिनीवृत्तम्)

अकृत भरतचक्री विश्वसाधर्मिकार्चां,
कुरुत तदनुमानाच्छ्रेयसेऽत्रोद्यमं तत् ॥
यदि सकलधरित्रीं प्रीणयत्यंबुवाहः,
किमु न तदरघट्टः क्षेत्रमात्रं पृणातु ॥ ७० ॥

अकृतेति । यदि भरतचक्री विश्वसाधर्मिकार्चा जगत्साधर्मिकवात्सल्यं अकृत अकार्षीत् । तर्हि तदनुमानात् भरतानुमानात् अत्र साधर्मिकभजायां श्रेयसे पुण्याय उद्यमं प्रयत्नं कुरुत । ननु भरतचक्री नवनिधिचतुर्दशरत्नस्वामी देवतानां सामर्थ्येन सर्वं कर्तुं समर्थः परं तदनुसारेण श्रावका अपि साधर्मिवात्सल्यं कुर्वंत्विति कथं युक्तं सामर्थ्याभवात् इति शंकां निरस्यन्नत्र दृष्टांतमाह । अंबुवाहो मेघो यदि सकलधरित्रीं सकलपृथ्वीं प्रीणयति तोषयति तर्हि अरघट्टः क्षेत्रमात्रं किमु न पृणातु न तर्पयतु ? अपि तु तर्पयतु । नवनिधिचतुर्दशरत्नस्वामी भरतचक्री मेघसदृशः श्रावका अरघट्टसदृशाः ॥ ७० ॥

जो के भरतचक्रवर्ती पण विश्वमां रहेला साधर्मिक भाइओनां पूजा सत्कार करता हता, तो पछी हे श्रावको! तमे पण तेमना अनुमानथी पुण्यने माटे साधर्मिक प्रजा उपर उद्यम करो. आ ठे काणे कोइ शंका करे के, भरततो नवनिधि अने चौदरत्नना स्वामी हता, तथा ते देवताना सामर्थ्यथी तेम करता, पण तेमना अनुमाननी श्रावकोए शीरीते करवुं? ते शंकाने दृष्टांतथी नाश करता छता कहे छे के, मेघनुं जल जो सर्व पृथ्वीने तृप्त करे छे तो अरघट्ट (रेहेंट) फक्त एक क्षेत्रने शुं नथी तृप्त करतो? अर्थात् भरत मेघ सरखा अने श्रावक रेहेंट सरखा जाणवा ॥ ७० ॥

(शार्दूलविक्रीडितवृत्तम्.)

श्राद्धानां सदुपासका वहुमता एवैकधर्मत्वतः,
साधूनामपि जातु गौरवपदं वीतस्पृहाणाममी ॥
रुग्नाशादुपसर्गहृत्स्तवनतः श्रीभद्रवाहोर्यथा,
चंद्रार्काब्दवदुत्तमेषु सहजं विश्वोपकारि व्रतम् ॥७१॥

श्राद्धानामिति। श्राद्धानां श्रावकाणां सदुपासकाः प्रधान श्रावका वहुमता वहुमान्या एव। कस्मात्। एकधर्मत्वतः एकः स मानो धर्मो येषां ते एकधर्माणस्तेषां भाव एकधर्मत्वं तस्मात् एक धर्मत्वतः। जातु कदाचित् साधुनामपि मुनीनामपि अमी श्राव का गौरवपदं आदरस्थानं भवति। किंभूतानां साधूनां। वीतस्पृ हाणां वीता गता स्पृहा वांच्छा येषांते वीतस्पृहास्तेषां नीरागाणा मित्यर्थः। कस्येव। श्री भद्रवाहोरिव। श्री भद्रवाहोर्यथा सदुपा

सकाः श्रावकाः गौरवपदं आदरस्थानं अभूवन् । कस्मात् । उपसर्गहृत्स्तवनतः 'उवसग्गहरंपासं' इतिस्तवनदानात् । किंभूतात् । रुग्नाशात् रुजां रोगाणां नाशो यस्मात् स रुग्नाशस्तस्मात्। ननु वीतस्पृहाः श्रावकान् कथं बहुमान्यंते । नैवं । उत्तमानां उपकारिस्वभावात् । दृष्टांतमाह । उत्तमेषु सत्पुरुषेषु सहजं स्वभाविकं विश्वोपकारि व्रतं समस्तोपकारकं व्रतं नियमो यस्मिन् कर्मणि यथा तथा । किंवत् । चंद्रार्काब्दवत् चंद्रसूर्यमेघवत् । यथा चंद्रसूर्यमेघेषु सहजं विश्वोपकारकं व्रतं भवति ॥ ७१ ॥

साधर्मिपणाने लीधे अति श्रेष्ठ उपासना करनारा श्रावको श्रावकोने तो बहुमान्य होय, परंतु तेओ कोइ वखत नीरागी एवा साधुओना पण भद्रबाहु स्वामीनी पेठे गौरवना स्थान रूप थाय छे. अहिं शंका करे के रागरहित साधुओने श्रावको बहुमान्य करवा योग्य केम होय? त्यां समाधान करे छे के. उत्तम पुरुषोनो उपकारी स्वभावज होय छे दृष्टांत कहे छे के. उत्तम पुरुषनुं चंद्र, सूर्य अने मेघ विगेरेनी पेठे सर्व उपर उपकार करवानुं स्वाभाविक व्रत होय छे ॥ ७१ ॥

हवे बे काव्यथी श्राविकाओ कहे छे.

स्त्री पुंसोप्यधिका त्रिपक्षविशदा पुंरत्नखानिर्यतः,
स्वामिन्या मरुदेवया तु सदृशी भूता न भाविन्यपि ॥
विश्वार्च्यौ जिनचक्रिणौ प्रथमतो यत्पुत्रपौत्रावतो,
या प्रागेव शुभेक्ष्यमुक्तिवपुरप्रस्थानकन्या प्रभोः॥ ७२॥

स्त्रीपुंसेति । स्त्री नारी पुंसोपि पुरुषादपि अधिका समधिका ।

किंभूता स्त्री । त्रिपक्षविपदा त्रिपक्षैर्मातृपितृस्वसुरपक्षरूपैर्निर्मला यतो यस्माद्धेतोः पुंरत्नखानिः पुरुषरत्ननिधानरूपा । अतोऽधिका पुरुषात् । तु पुनर्मरुदेवया स्वामिन्या सदृशी तुल्या न भूता न जाता न भाविन्यपि न भविष्यति निश्चयेन । यत्पुत्रपौत्रौ यस्या मरुदेवायाः पुत्रपौत्रौ अहो इत्याश्चर्ये विश्वार्यौ त्रैलोक्यपूज्यौ जिनचक्रिणौ अर्हच्चक्रवर्त्तिनौ प्रथमतः पूर्वं अभूतां । या मरुदेवा प्रभोः श्री आदिनाथस्य प्रागेव पूर्वमेव शुभेह्नि शुभदिवसे शिवपुरप्रस्थानकस्थामोक्षनगरप्रस्थानवर्त्तमानाभूज्जाता ॥ ७२ ॥

पितृपक्ष, मातृपक्ष अने श्वसुरपक्ष एम त्रणे पक्षे निर्मल एवी स्त्री, पुरुषथकी पण अधिक छे. कारण के, ते पुरुषरूप रत्ननी खाण छे. वली मरुदेवी माता समान तो कोइ स्त्री थइ नथी अने थनार पण नथी. कारण के, तेमना पुत्र ऋषभदेव अने पौत्र (पुत्रनो पुत्र) भरत सर्व विश्वने विषे पूज्य तीर्थंकर तथा चक्रवर्त्ती थया छे. वली जे मरुदेवी माता पोते श्री आदिनाथ प्रभुनी पहेलाज शिवपुरप्रत्ये प्रस्थान करनारा थया. ॥ ७२ ॥

(वसंततिलकावृत्तम्.)

या श्राविकाप्यमलशीलपवित्रितांगी,
सा श्लाघ्यते त्रिभुवनेऽपि यथा सुभद्रा ॥
यस्यास्त्रिवारिचुलकाहितलोकतुष्टेः,
स्रोतःसहस्रकृतमुत् सदृशी क गंगा ॥ ७३ ॥

येति । या अमलं च तच्छीलव्रतं च अमलशीलव्रतं निर्मल

शीलव्रतं तेन पवित्रितं पवित्रीकृतं अंगं यया सा श्राविकापि स-
ती सा स्त्री त्रिभुवने लोकत्रये श्लाघ्यते वर्ण्यते । केव । यथा सुभ-
द्रा । यस्याः सुभद्रायाः सदृशी गंगा क्व । किंरूपा गंगा । स्रोतः-
सहस्रेण प्रवाहसहस्रेण कृता मुद् हर्षो यया सा तथा । किंरूपायाः
सुभद्रायाः । त्रिभिर्वारिचुलकैर्जलांजलिभिराहिता आरोपिता कृता
लोकानां तुष्टिः यया सा तथा ॥ ७३ ॥

निर्मल शीलवडे पवित्र छे अंग जेनुं एवी श्राविका पण
सुभद्रानी पेठे त्रण भुवनने विषे प्रशंसा पामे छे. दृष्टांत कहे छे
के हजारो प्रवाहोवडे हर्ष करनारी गंगा. फक्त त्रण अंजलीथी लो-
कोने संतुष्ट करनारी सुभद्राना समानपणाने क्यांथी पामे ? ।७३।

हवे बे काव्यथी पूजाद्वार कहे छे

पुष्पाक्षतांबुफलचंदनदीपधूप—
नैवेद्यतः प्रतिदिनं जिनपादपूजा ॥
श्री श्रेणिकादिजनवज्जिनतादि दत्ते,
चक्रादयः कलगतामिव सूहलस्य ॥ ७४ ॥

पुष्पेति । पुष्पं १ अक्षताः २ अंबु ३ फलं ४ चंदनं ५ दीपः ६
धूप ७ नैवेद्यतः ८ इत्येतैः कृत्वा प्रतिदिनं नित्यं जिनपादपूजा जि-
नेश्वरचरणसेवा श्री श्रेणिकादिजनवच्छ्रेणिकनृपादिलोकवज्जिन-
तादि तीर्थंकरत्वादिकं दत्ते । कस्येव के कां दत्ते । चक्रादयः च-

क्रदंडरज्जुकुंभकाराः मृद्दलस्य मृत्तिकापिंडस्य कलशतामिव घ-
त्वमिव ददाति ॥ ७४ ॥

जेम चक्र, दंड, दोरडी अने कुंभार ए सर्व एकठा थइने मा
टीना पींडानो घडो बनावी आपे छे तेम जिनेश्वर प्रभुनी निरंतर
पुष्प, अक्षत, जल, फल, चंदन, दीप, धूप अने नैवेद्य इत्यादिकथी
करेली पूजा, श्रीश्रेणिक राजाने आप्युं तेम तीर्थंकर पद आपेछे.७४

(स्वागतावृत्तम्.)

स्याज्जिनार्चनकृतस्त्रिकशुद्ध्या,
शं विपद्यपि यथा दमयंत्याः ॥
स्वस्तरुः फलति किं न हि रोरे,
नेंदुरस्यति तृषं च चकोरे ॥ ७५ ॥

स्यादिति । त्रिकशुद्ध्या मनोवाक्कायनैर्मल्येन जिनार्चनकृतः
श्रीजिनपूजाकारकस्य नरस्य विपद्यपि शंकटेऽपि शं सुखं स्यात्
यथा दमयंत्या नलपत्न्या विपद्यपि जिनपूजां कुर्वत्याः सुखं जातं।
दृष्टांतावाह । हि रोरे दारिद्र्ये सति स्वस्तरुः कल्पवृक्षः किं न फ-
लति। अपि तु फलति। च पुनरिंदुः चकोरे तृषं तृष्णां किं न अ-
स्यति न क्षिपति अपि तु अस्यत्येव ॥ ७५ ॥

त्रिकरण शुद्धिथी जिनपूजा करनारने दमयंतीनी पेठे आपत्ति
मां पण सुख थाय छे. दृष्टांत कहे छे के, दारिद्री माणसने कल्प-

वृक्ष शुं फलीभूत नथी थतुं? अथवा चंद्रमा चकोर पक्षीनी तृष्णा नथी दूर करतो? ॥ ७५ ॥

हवे बे काव्यथी नयद्वार कहे छे.

(इन्द्रवज्रावृत्तम्.)

श्रीरामवन्नो नय एव सेव्यः,
प्रजानुरागव्रतवित्तमूलम् ॥
को दक्षिणावर्त्तमुपेत्य शंखं,
त्यजेन्मुधा शामलचित्रकं च ॥ ७६ ॥

श्रीरामवदिति । भो लोकाः श्री रामवन्नयो न्याय एव सेव्यः । किंरूपो नयः । प्रजानुरागो लोकानुरागः स एव व्रतं निश्चयो यस्य तत् एवं विधस्य वित्तस्य मूलं उत्पत्तिकारणं । दृष्टान्तमाह । को नरो जनो दक्षिणावर्त्तं शंखं उपेत्य प्राप्य मुधा वृथा त्यजेत् मुंचेत् । अपि तु न कोऽपि त्यजेत् । गृह्णीयादित्यर्थः । च पुनः कृष्णचित्रकं उपेत्य प्राप्य को मुधा वृथा त्यजेत् न कोऽपीत्यर्थः ॥ ७६ ॥

हे प्राणीओ! तमारे श्री रामचंद्रनी पेठे प्रजाना अनुराग रूप व्रतवाला द्रव्यना मूल उत्पत्ति कारण रूप न्यायनुं सेवन करवा योग्य छे. दृष्टांत कहे छे. कयो पुरुष प्राप्त थयेला दक्षिणावर्त शंखने अने चित्रावेलीने मेळव्या पछी दूर न्हाखी दे? अर्थात् कोइ न न्हाखे. ॥ ७६ ॥

(मालिनीवृत्तम्.)

मनसि वसति शश्वन्न्याय एवोत्तमानां,
यदमरवरलब्ध्या पारदारिक्यचौर्ये ॥
अनुविषयमरौत्सीच्चक्रभृद्ब्रह्मदत्तः,
क्व सुरसरिति पंकः क्वेशचंद्रे कलंकः ॥ ७७ ॥

मनसीति । उत्तमानां श्रेष्ठपुरुषाणां मनसि शश्वन्निरंतरं न्याय एव वसति । यदस्मात् कारणात् ब्रह्मदत्तश्चक्रभृत् अमरवरलब्ध्या देवप्रसादप्राप्त्या पारदारिक्यं च चौर्यं च पारदारिक्यचौर्ये परस्त्रीलंपटताचौर्ये अनुविषयं अनुदेशं अरौत्सीत्तरुरोध निवारयामास । दृष्टांतावाह । सुरसरिति गंगानद्यां पंकः क्व । अपि तु गंगायां कर्दमो न स्यात् । ईशचंद्रे ईश्वरमस्तकस्थितचंद्रे कलंको लांच्छनं क्व । अपि तु न स्यात् ॥ ७७ ॥

उत्तम पुरुषोनां मनने विषे निरंतर न्यायज वसे छे कारण के, ब्रह्मदत्त चक्रवर्तीए पण पोताना प्रत्येक देशमां देवतानां वरदानथी परदारागमन अने चोरी ए बंने कार्यने निवारण कर्युं हतुं दृष्टांत कहे छे के, स्वर्गगंगाना जलने विषे कादव क्यांथी होय? अने शंकरना मस्तक उपर रहेला चंद्रने विषे कलंक क्यांथी होय? ७

(वसंततिलकावृत्तम्.)

विद्याविभूतिमहिमव्रतधर्ममोक्ष-
संपत्तये विनय एव विभुः किमन्यैः ॥

किं किं नमिः सविनमिर्जिनतो न लेभे,
पूज्यांघ्रिरेणुरपि पश्य नमस्य एव ॥ ७८ ॥

विद्येति । विद्याविभूतिमहिमव्रतधर्ममोक्षसंपत्तये ज्ञानलक्ष्मीप्रभावनियमपुण्यनिश्रेयसानां संप्राप्तये विनय एव विभुः समर्थः । अन्यैः प्रकारैः किं । विनय एव कार्यः । दृष्टांतमाह । नमिः सविनमिः विनमिसहितः विनयतत्परः सन् जिनतः श्री आदिनाथतः किं किं न लेभे । अपि तु राज्यादिकं सर्वं प्राप्तवान् । पश्य विलोकय । पूज्यांघ्रिरेणुरपि नमस्य एव गुरुजनपादधूलिरपि नमस्करणीया. ७८

विद्या सम्पत्ति यश व्रत. धर्म अने कल्याण वगेरे पामवाने माटे लववाने विनयज समर्थ छे बीजी वस्तुओए करीने शुं? दृष्टांत कहे छे के. विनयमां तत्पर एवा विनमि सहित नमिए श्रीआदिनाथ प्रभुपासेथी शुं शुं मेलव्युं नथी? जूओ! पूज्यना चरणनी रज पण नमन करवा योग्य छे ॥ ७८ ॥

(शार्दूलविक्रीडितम्)

किं मर्त्यस्त्रिदशोऽप्यपास्तविनयो म्लानेः सदानेः पदं.
यक्षो वृद्धकरः किमार्यखपटाचार्येण नाशिक्षितः ॥
किं वा विष्णुकुमारतो न नमुचिर्मृत्वाऽगमद्दुर्गतिं.
नयोघस्तसमुन्नतं रुजति वा नम्रं तु नो वेतसम् ॥ ७९ ॥

किमिति । निर्दलत्वान्मर्त्यैः किं मनुष्यैः किं । मनस्विनि

दशोऽपि देवोऽपि अपास्तविनयः त्यक्तविनयगुणः सन् सहानेः हानिसहिताया म्लानेः पराभवस्य पदं स्थानं स्यात् । आर्यखपटाचार्येण वृद्धकरनामा यक्षः किं नाशिक्षितः । अपि तु शिक्षित एव । वा अथवा नमुचिः प्रधानो विष्णुकुमारनामतो मुनितो मृत्वा प्राणांस्त्यक्त्वा दुर्गतिं नरकं किं नागमत् न जगाम अपि तु जगाम। दृष्टांतमाह । नद्योघः नदीप्रवाह उन्नतं तरुं वृक्षं रुजति पातयति वा पुनः नम्रं वेतसं वेतसनामानं वृक्षं नो रुजति न पातयति. ७९

निर्बल माणसनी तो वातज शी करवी; परंतु बलवंत एवा देवता पण विनयने त्यजीदेवाथी हानिसहित पराभव पामे छे. शुं (अविनयथी) वृद्धकर नामना यक्षने आर्यखपटाचार्ये शिक्षा नथी करी? अथवा तो नमुचि प्रधान, विष्णुकुमारथी मृत्यु पामीने दुर्गतिप्रत्ये नथी गयो? दृष्टांत कहे छे के, नदीना जलनो प्रवाह उंचा एवा वृक्षने पाडी नाखे छे अने नम्र एवा नेतरना वृक्षने उखाडी नाखतो नथी ॥ ७९ ॥

हवे बे काव्यथी वैराग्यद्वार कहे छे.

राज्यं शक्रकृताभिषेचनमहो रूपं त्रिलोकेऽप्यस-
त्सारूप्यं च सनत्कुमारनृपतेः सोऽप्यंगवैराग्यतः॥
चक्रे चारुतपः सलब्धिरपि तत् स्वं नाचिकित्सत्पुना,
रज्येद्दा प्रतिकर्मनिर्मलरुचौ कः कुप्यपात्रे सुधीः ॥८०॥

राज्यमिति । सनत्कुमारनृपतेः सनत्कुमारनाम्नश्चतुर्थचक्रवर्तिनो राज्यं शक्र इंद्रस्तेन कृतं अभिषेचनं पट्टाभिषेको यत्र तत्

एवंविधमासीत् । अहो इत्याश्चर्ये रूपं एवंविधं बभूव । त्रिलोकेऽपि असत्सारूप्यं असदविद्यमानं सारूप्यं सादृश्यं यस्य तत् । सोऽपि सनत्कुमारचक्रवर्त्ती अंगवैराग्यतः शरीरविरागतश्चारुतपः प्रधानतपश्चक्रे चकार । पुनर्भूयोऽपि स चक्रवर्त्ती सनत्कुमारो मुनिः सलब्धिरपि लब्धिमानपि तत् स्वं स्वकीयं अंगं न अचिकित्सत् चिकित्सां न कारयामास ॥ दृष्टांतमाह । कः सुधीः विद्वान् पुरुषः प्रतिकर्मणा उद्वर्त्तनेन निर्मला कांतिर्यस्य स तथा एवंविधे कुप्यपात्रे रज्येत् रागं कुर्यात् । अपि तु न कोऽपि ॥ ८० ॥

इंद्रे अभिषेक करेलुं राज्य अने त्रण लोकने विषे असमान एवुं रूप ए बन्ने जेने हतां एवा सनत्कुमार चक्रवर्तीए पण शरीर उपर वैराग्य उत्पन्न थवाथी महातप कर्युं. वली तेज मुनिए लब्धि छतां पण शरीरनी चिकित्सा करी नहीं. दृष्टांत कहे छे के, मांजवाथी उज्वल थयेला पीतलना पात्रने विषे कयो डाह्यो पुरुष आसक्त थाय? अर्थात् कोइ थाय नहीं. ॥ ८० ॥

आजन्मांतमनंतदुर्मतिभवे वैराग्यमस्त्येव त-
द्व्यक्तं हेतुषु सत्सु किं तु भवति प्रत्येकबुद्धेष्विव ॥
सूर्याद्र्यन्यनलं पयः शशिमणौ स्वर्णं सुवर्णावनौ,
कोऽद्राक्षीत् पुनरर्कचंद्रहुतभुग्योगात्कुतोऽप्येति वा।८१।

आजन्मांतमिति । अनंता दुर्मतिर्दुष्टबुद्धिर्यत्र स अनंतदुर्मतिः सचासौ भवश्च तस्मिन् संसारे आजन्मांतं उत्पत्तिमारभ्य मरणं यावत् जीवानां वैराग्यमस्त्येव । किंतु परंतु हेतुषु कारणेषु सत्सु तद्वैराग्यं

व्यक्तं प्रकटं भवति । केषु इव । प्रत्येक बुद्धेष्विव । यथा करकंडवादिषु चतुर्षु प्रत्येकबुद्धेषु हेतुषु वृषभादिकारणेषु विद्यमानेषु वैराग्यं व्यक्तं बभूव ॥ दृष्टांतानाह ॥ को नरः सूर्याश्मनि सूर्यकांतौ अनलं वैश्वानरमद्राक्षीत् । अपि तु न कोऽपि ददर्श । पुनरर्कसंयोगादग्निः कुतःस्थानादेति आगच्छति ।शशिमणौ चंद्रकांतमणौ पयः सुधां कोऽद्राक्षीत् अपितु न कोऽपि । पुनश्चंद्रयोगात्पयः कुतोऽप्यागच्छति । सुवर्णावनौ स्वर्ण कोऽद्राक्षीत् न कोऽपि । पुनरग्निसंयोगात्स्वर्ण कुतोऽप्यागच्छति । ॥ ८१ ॥

जन्मथी आरंभीने मृत्यु पर्यंत अनंतदुःखथी भरेला एवा आ संसारने विषे वैराग्य तो छे, परंतु ते वैराग्य चार प्रत्येक बुद्धने प्रगट थयो तेम हेतु प्राप्त थये छते सर्वने प्रगट थाय छे. दृष्टांत कहेछे के, सूर्यकांत मणिने विषे अग्नि, चंद्रकांत मणिने विषे जल अने सुवर्ण पृथ्वीने विषे सुवर्ण ए सर्व कोइए जोया छे ? ए तो सूर्य, चंद्र अने अग्निना योगने लीधे ज कोइ स्थानकथी आवे छे. ॥ ८१ ॥

हवे बे काव्यथी दानद्वार कहेछे.

(स्रग्धरावृत्तम्.)

सुप्रापं शुद्धपात्रं धनमपि विपदं किं तु निःपुण्यकानां,
नो चित्तं पात्रदानं प्रति भवति मतिर्यत्र शुद्धाशनाद्यैः ॥
आद्योऽर्हन् वर्षमेकं प्रतिदिनमगमच्छुद्धभैक्षेऽपि देशे,
श्रेयांसस्त्वेक आद्यं सुकृतिषु कृतवान् स्वं प्रभोःपारणेन।

सुप्रापमिति ॥ शुद्धपात्रं निर्मलपात्रं सुप्रापं सुखलभ्यं । विपदं

धनमपि सुप्राप्यं सुलभं । किंतु निःपुण्यकानां पुण्यरहितानां पात्रदानं प्रति चित्तं मनो नो भवति । यत्र चित्ते शुद्धाशनाद्यैः निर्दोषान्नादिभिः कृत्वा मतिः स्यात् । तादृशं चित्तं पात्रदानं प्रति न स्यात् । दृष्टांतमाह । आद्योऽर्हन् श्रीआदिनाथः एकं वर्षं यावत् प्रतिदिनं शुद्धभैक्षेऽपि देशे प्रचुरनिष्पन्नधान्यादौ देशमध्येऽगमज्जगाम । तु पुनः श्रेयांसः श्रेयांसकुमारः एक स्वमात्मानं सुकृतिषु पुण्यवत्सु आद्यं प्रथमं कृतवान् अकार्षीत् । केन कृत्वा । प्रभोः श्रीआदिनाथस्य पारणेन ॥ ८२ ॥

शुद्ध पात्र मळे. धन पण सुद्ध होय· छतां पुण्यरहित जनोनुं चित्त पात्रदान प्रत्ये थतुं नथी के. जे चित्तने विषे शुद्ध एवां अशन. पान खादिम. स्वादिम विगेरेनी बुद्धि होय. दृष्टांत कहेछे के. प्रथम तीर्थंकर श्री ऋषभदेव शुद्ध एवा अन्नथी भरपूर एवा देशने विषे एक वर्षपर्यंत प्रतिदिवस विचर्या छतां पण फक्त एक श्रेयांस कुमारेज प्रभुने पारणुं करावीने पुण्यवंत पुरुषोनी मध्ये पोताना आत्माने अग्रेसर कर्यो. ॥ ८२ ॥

(मालिनीवृत्तम्.)

यदपि तदपि शुद्धं चंदनावत्प्रदत्तं.
झटिति फलति पात्रेऽन्यत्र नो चार्वपि स्वम् ।।
जलधिजलमसारं वारिवाहेऽमृतीस्यात् ,
मधुरमपिहि दुग्धं पन्नगास्ये विषं स्यात् ॥ ८३ ॥

यदपीति । यदपि तदपि यादृशमपि तादृशमपि शुद्धं अन्न

दिकं पात्रे शुद्धपात्रे प्रदत्तं सत् चंदनावत् चंदनाया इव शीघ्रं फलति सफलीभवति। अन्यत्र पात्रादन्यत्रस्थानेऽपात्रे चारुमपि मनोहरमपि स्वं द्रव्यं दत्तं सन्नो न फलति। अत्र दृष्टांतद्वयमाहि असारं साररहितं जलधिजलं समुद्रपानीयं वारिवाहे मेघे अमृतीस्यात् सुधारूपं भवति। मधुरमपि आस्वाद्यमपि दुग्धं पन्नगास्ये सर्पमुखे विषं स्यात् ॥ ८३ ॥

जेवुं तेवुं पण शुद्ध अन्नादिक जो पात्रने विषे आप्युं होय तो ते चंदनबालाने फल्युं तेम तत्काल फले छे, पण अपात्रने विषे आपेलु सारुं द्रव्य फलतु नथी, पण विपरीत रूपे परणमे छे। दृष्टांत कहे छे के, खारुं एवुं पण समुद्रनुं जल मेघने विषे अमृत समान थाय छे अने मधुर एवु पण दुध सर्पना मुखने विषे विष थाय छे. ॥ ८३ ॥

हवे ये काव्यथी शीलद्वार कहे छे.

(वसंततिलकावृत्तम्.)

स्त्रीविभ्रमैश्चलति लोलमना न वीरः,
श्रीस्थूलभद्र इव तादृशसंकटेऽपि ॥
चूर्णीभवेद्दृषदयोऽपि विलियते च,
वैडुर्यमनि विकृतिं ज्वलनात्पुनर्न ॥ ८४ ॥

। स्त्रीविभ्रमैरिति । लोलमनाश्चपलचित्तः पुरुषः स्त्रीविभ्रमैः स्त्रीणां हावभावैश्चलति चपलचित्तो भवति । वीरो न न चलति धीरः स्थू इव । तादृशसंकटेऽपि कोशागृहवेश्यागृहवासेऽपि श्री स्थू

हवे ये काव्यथी भावनाद्वार कहे छे.

(स्रग्धरावृत्तम्.)

दानं वित्तव्ययेनापरयुवतिरतित्यागतः शीललीला,
नानाहाराप्रचारात्तप इह तदहो हृद्यपध्यानहीनाः ॥
भावं कुर्वंतु येनाप्यखिलसुखभृतां वल्कलस्येव मुक्ति
मिष्टास्वादैर्यदि स्यान्ननुतनुपटुता को न तां कारयेत्तत् ॥ ८८ ॥

दानमिति । वित्तव्ययेन द्रव्यव्ययेन दानं भवति । शीललीला अपरयुवतिःपरस्त्रीस्तस्यां रतित्यागतः संभोगमोचनात् भवति। इह जगति नानाहाराप्रचारात् नानाविधाहारमोचनात्तपो भवति। तत्तस्मात् कारणात् अहो इत्याश्चर्ये। हृदि मनसि अपध्यानहीनाः दुष्टध्यानरहिताः संतो भावं कुर्वंतु। येनभावेन अखिलसुखभृतां समस्तसौख्यधारकाणां प्राणिनां वल्कलस्येव वल्कलचीरिबालतपस्विवत् मुक्तिर्भवति ॥ दृष्टांतमाह ॥ ननु निश्चितं यदि तनुपटुता शरीरनिरामयता मिष्टास्वादैः शर्करादिभिः स्यात् तर्हि तां तनुपटुतां को न कारयेत् अपि तु सर्वोऽपि लोकः कारयति॥ ८८॥

आ लोकोने विषे द्रव्यनो व्यय करवाथी दान थाय छे, पर स्त्रीने विषे प्रीतिनो त्याग करवाथी शील कहेवाय छे अने नाना प्रकारना आहारना परित्यागथी तपश्चर्या थाय छे, माटे हे भव्यजनो! तमे हृदयमांथी दुष्ट ध्यानने दूर करीने ते दान, ब्रह्मचर्य अने तप विगेरेने विषे भाव करो के, जेथी सर्व प्रकारना सुखने धारण करनाराओनी मध्ये वल्कलचीरिनी पेठे तमारी पण मुक्ति थाय.

थी अग्निना पाषाणमां कांति प्रगट थाय छे, दर्पणमां सूर्यनी कांतिथी प्रकाश थाय छे, परंतु म्होटा एवा औषधीओना वनने विषे जे कांति होय छे तेतो निश्चे स्वभाविकज होय छे. ॥ ८९ ॥

हवे वे काव्यथी धर्मद्वार कहे छे.

(स्रग्धरावृत्तम्.)

मातुर्गर्भावतारे चतुरधिकदशस्वप्नसंसूचितौ प्राक्-
जातौ यावेकरात्रौ त्वजितसगरयोःपुण्ययोःपश्य जातिम्
आगर्भोत्पादमिंद्रैरसुरसुरनरैः सेवनीयस्त्रिलोकी-
नाथोऽर्हन्नेक आसीद्भरतनृपनतोऽन्यश्च चक्री द्वितीयः ९०

मातुरिति। यौ अजितसगरौ एकरात्रौ एकस्मिन् रात्रौ जातौ उत्पन्नौ। किंभूतौ। मातुर्गर्भावतारे जनन्याः कुक्ष्यवतारे चतुरधिकदशस्वप्नैश्चतुर्दशस्वप्नैः संसूचितौ प्रख्यापितसुभाग्यौ। पुण्ययोः पवित्रयोः तयोरजितसगरयोरजितनाथसगरचक्रवर्तीनोः जातिं पश्य। हे भविक इतिशेषः। तयोरुत्पत्तिमाह। एकः श्री अजितनाथः आगर्भोत्पादं गर्भोत्पत्तियावत् गर्भोत्पातिमारभ्येत्यर्थः इंद्रैः सुराधिपैः असुरसुरनरैः दैत्यदेवमनुष्यैः सेवनीयः पूजनीयः। अर्हन् किं रूपः। त्रिलोकीनाथः लोकत्रयपतिः। अन्यश्च द्वितीयश्चक्री सगरचक्रवर्ती बभूव। किं रूपः। भरतनृपनतः भरतक्षेत्रस्य राजभिर्नमस्कृतः॥ ९० ॥

जेओ पहेलां चौद स्वप्नोए सूचित होइ माताना गर्भावतारने

विषे एक रात्रीमां उत्पन्न थइ पुण्यशाली एवा अजितनाथ अने सगर चक्रवर्ती थया तेमनी जाति जूओ. तेमनामांथी एक गर्भमां रह्या त्यारथीज इंद्र, देव, भवनवाली अने मनुष्योए सेवा करवा योग्य एवा त्रिलोकीनाथ श्रीतीर्थंकर थया. अने बीजा भरतखंडना राजाओए नमस्कार करेला चक्रवर्ती थया. ॥ ९० ॥

तुल्यं तीर्थाधिपत्यं वलमपि सदृशं सर्वतीर्थंकराणां.
किं तु श्रीमल्लिनाथः प्रथयति सुकृतैः किंचिदाश्चर्यमुच्चैः
पूर्वाह्णे यस्य जज्ञे व्रतमपि सुलभं केवलं चापराह्णे.
ज्ञानं नाभेयवीरप्रभृतिजिनपतेरप्यभूद्यच्चिरेण ॥९१॥

तुल्यमिति । सर्वतीर्थंकराणां समस्तार्हतां तीर्थाधिपत्यं तुल्यमेव । बलं शक्तिरपि सदृशमेव । किं तु पुनः श्रीमल्लिनाथः सुकृतैः पुण्यैः कृत्वा उच्चैरतिशयेन किंचिदाश्चर्यं प्रथयति विस्तारयति । यस्य श्रीमल्लिनाथस्य पूर्वाह्णे पूर्वदिवसे व्रतमपि सुलभं जज्ञे च पुनरपराह्णे पाश्चात्यदिवसे केवलं केवलज्ञानं जज्ञे जातं । यत्केवलज्ञानं नाभेयवीरप्रभृतिजिनपतेरपि ऋषभवीरादिजिनानां दीर्घेण दीक्षाग्रहणान्तरं वर्षादिभिर्बहुभिर्भूतमिति निष्कर्षः ॥ ९१ ॥

[illegible]

हवे बे काव्यथी विषयद्वार कहे छे.

श्रुत्वाह्वानं स्त्रियस्तामनुसरति रसो हंसकोन्नादपादे-
नाशोकस्पृष्टमात्रस्तिलककुरुवकौ चुंबनालिंगनाभ्याम्
पुष्प्येद्वक्त्राब्जवासाधिकरससुरया केसरश्चेद्विकारोऽ-
प्येषां तत्सत्यकीवाधिकविषयरतिर्यातु किं नो भवार्तिम्

श्रुत्वेति । रसः पारदः स्त्रिय आह्वानं आमंत्रणं श्रुत्वा आकर्ण्य तां स्त्रियमनुसरति अनुयाति । अशोको वृक्षः स्त्रिया हंसकोन्नादपादेन हंसकेन नूपुरेण उन्नदतीति शब्दायत इति हंसकोन्नादश्चासौ पादश्चेति कर्मधारयः तेनस्पृष्टमात्रः सन् पुष्प्येत् । तिलककुरवकौ नामानौ वृक्षौ स्त्रियश्चुंबनालिंगनाभ्यां कृत्वा पुष्प्येतां । केसरः केसरनामा वृक्षः स्त्रियो वक्त्राब्जवासाधिकरससुरयामुखकमलाधिकरसमदिरया कृत्वा पुष्प्येत् । एषामेकेंद्रियाणां पारदादीनां चेद्विकारो मदनविक्रिया वर्त्तते तर्हि सत्यकीव सत्यकीनामा विद्याधर इव अधिकविषयरतिः अधिका विषयरतिर्यस्य स एतादृशः पुरुषः भवार्तिं संसारपीडां किं नो यातु नो गच्छतु अपितु यात्वेव ॥ ९२ ॥

पारो स्त्रीना आमंत्रणने सांभली ते स्त्रीनी पाछल जाय छे; अशोक वृक्ष स्त्रीना झांझरथी शब्दित थता पगवडे स्पर्शित थयो छतो प्रफुल्लित थाय छे, तिलक अने कुरवक वृक्ष स्त्रीना चुंबन अने आलिंगन एम अनुक्रमथी प्रमोदित थाय छे अने केशर वृक्ष मुखकमलथी अधिक सुवासित मदिराथी प्रफुल्लित थाय छे.

आ प्रमाणे जो आ एकेंद्रिय वृक्षोमां पण विकार रहेलो छे तो त्यक्की विद्यावन्नी पेठे विषयमां अधिक प्रीतिवालो माणस संसारनी पीडाने केम न पामे? अर्थात् पामेज. ॥ १२ ॥

संसारारण्यमध्ये मधुरसुखकटुप्रांतभृत्कामधूर्तो,
दक्षान्मूढांश्च तत्तत्सुखलवभजनैः प्राणिनो विप्रतार्य ॥
हत्वा तत्पुण्यवित्तं गमयति कुगतिं ब्रह्मदत्तं यथा तत्-
पूर्वभ्रातेव धीरःशिवमटति पुनस्तं तपोऽस्त्रेण भित्वा १३

संसारेति । कामधूर्तः कामोऽनंगः स एव धूर्तः तत्पुण्यं धर्म एव वित्तं हृत्वा गृहीत्वा आदाय ब्रह्मदत्त यथा ब्रह्मदत्तचक्रिणमिव कुगति नरकं गमयति प्रापयति । किं कृत्वा । दक्षान् निपुणान् मूढान्मूर्खांश्च प्राणिनो जीवान् तत्तत्सुखलवभजनैः तत्तत्सुखलव-सेवनैर्विप्रतार्य वञ्चयित्वा । किंरूपः सन् प्राणिनो विप्रतार्य [illegible] । संसारारण्यमध्ये भवाटवीमध्ये मधुरं प्रांते कटु प्रांते [illegible] म-धुरसुखकटुप्रांतभृत् । [illegible] तत्पूर्वभ्रातेव पूर्वजन्मनि ब्रह्मदत्तचक्रिभ्राता मुनिरिव धीरो [illegible] पुरुषः [illegible] अ-टति गच्छति । किं कृत्वा । [illegible] कामधूर्तं तप एव [illegible] तेन तपोऽस्त्रेण भित्वा [illegible] ॥ १३ ॥

[illegible]

न्मना भाइना जेवो धीर पुरुष होय छे ते, ते कामरुपी धूर्तने तप रूपी शस्त्रवडे भेदी नाखी मोक्ष मेलवे छे. ॥ ९३ ॥

हवे बे काव्यथी शब्दद्वार कहे छे.

(वसंततिलकावृत्तम्.)

गीतामृतातिरतिकर्णपुटस्त्रिपृष्ट-
पर्यंकपाल इव कष्टमुपैति घोरम् ॥
सछद्मलुब्धककृताद्भुतगीतलुब्धं,
बद्धं विलोकय मृगं भयविह्वलांगम्॥ ९४ ॥

गीतेति । गीतमेव अमृतं तत्र अतिरतिः अत्याशक्तिर्ययोस्तौ गीतामृतातिरसौ एवं विधौ कर्णपुटौ यस्य स तथा । यस्यास्तं कर्णरसो भवति सः पुरुषः घोरं भयानकं कष्टमुपैति प्राप्नोति कथमिव । त्रिपृष्टपर्यंकपाल इव त्रिपृष्टवासुदेवस्य शय्यापालक इव । दृष्टांतमाह । मृगं एवंविधं विलोकय पश्य । किदृशं । भयेन विह्वलं कातरं अंगं अस्य स तं । पुनः किदृशं । सछद्मभिः सकपटैर्लुब्धकैरापेटकैः कृतं अद्भुतगीतं गानं तत्र लुब्धं लोलुपं अत एव रज्वादिना बद्धम्. ॥ ९४ ॥

गीतरूप अमृतने विषे अति आसक्त छे कान जेना एवो पुरुष, त्रिपृष्ट वासुदेवना शय्यापालकनी पेठे घोर दु:ख पामे छे. दृष्टांत कहे छे के, कपटी पारधीए करेला अद्भुत गीतमां लुब्ध थयेला अने तेथीज पासमां पडी बंधन पामेला, तेमज भयथी विह्वल अंगवाला मृगने जूओ. ॥ ९४ ॥

स्यात् क्षुल्लकाभिधकुमारवदस्थिरेषु-
स्थैर्याय गीतमपि बोधकरं कदाचित् ॥
बालोऽपिनिर्वृतिमुपैति निशम्य सम्यक्
मात्रोदितानि कलमन्मथगीतकानि ॥ ९५ ॥

स्यादिति । गीतमपि कदाचित् अस्थिरेषु पुरुषेषु स्थैर्याय निश्चलाय भवति बोधकरं ज्ञानकारकं च स्यात् । किंवत् । क्षुल्लकाभिधकुमारवत् यथा क्षुल्लकनाम्नि राजकुमारे मुनौ अस्थिरे गीतं स्थैर्याय जातं । सुट्टु गाइयं सुट्टु निवाइयमितिगीतं ॥ दृष्टांतमाह । बालोऽपि शिशुरपि मात्रा जनन्या उदितानि कथितानि कलमन्मथगीतकानि कलानि मधुराणि मन्मथानि प्रीयाणि गीतकानि गीतानि सम्यक् निशम्य श्रुत्वा निर्वृतिं सुखमुपैति गच्छति॥९५॥

गीत पण क्वचित् क्षुल्लक कुमारने थयुं तेम अस्थिरने स्थिर करनारुं अने बोध करनारुं पण थाय छे दृष्टांत कहे छे के बालक पण माताए करेला मधुर प्रीय गीतोने सारी रीते सांभलीने सुख पामे छे ॥ ९५ ॥

हवे बे काव्यथी नमस्कार करे छे.

(वसन्ततिलकम्)

नो विद्युदुष्णरुचिनाथापि न लक्ष्मदृष्युक्तमाविष्करोति.
दुःखतरंवान्न वेत्ति प्रथयाति न स्नात् रूपानिर्मलदृष्टिः॥

तद्दृष्टयेकेंद्रियेऽस्मिन्नहिताहितमतिः का कुमाराग्रनंदौ,
चंपापूःस्वर्णकारे विवशदृशि यथा पंचशैलेशदेव्योः

नो विदतीति । रूपे निर्मग्ना दृष्टिर्यस्य स रूपनिर्मग्नदृष्टिः पुरुषः उष्णशीताद्यपि नो विदति न जानाति । सत् प्रधानं जल्पं विरूपमपि कर्म उक्तं भाषितं न आविःकरोति न प्रकटीकरोति । दुःसद्गंधान् दुर्गंधान् सद्गंधान् न वेत्ति न जानाति । रसान् शृंगारादीन् न प्रथयति न विस्तारयति। तत्तस्मात् कारणात् अस्मिन् दृष्टयेकेंद्रिये दृष्टिरेव एकं इंद्रियं यस्य स तस्मिन् अहिताहितमतिः का स्यात् अहिते सर्पादौ हिते मातृधर्मादौ किदृशी बुद्धिः स्यात् । अपि तु न किदृशी अपि । कस्मिन्निव । यथा कुमाराग्रनंदौ नाम्न्यपि चंपापूःस्वर्णकारे चंपापुरिसक्ते स्वर्णकारे रूपनिर्मग्नदृष्टौ सति किदृशी मतिरासीत् । अपि तु न काप्यासीत् । किंविशिष्टे स्वर्णकारे। पंचशैलेशदेव्योः पंचशैलपर्वतस्वामिन्योर्हासाप्रहासानाम्न्योर्देव्योर्विवशदृशि विह्वला दृष्टिर्यस्य स तथा तस्मिन् ९६

पंचशैल पर्वत उपर निवास करनारी हासा प्रहासा देवीओ उपर अनुरागवंत थयेला चंपानगरीना सोनी कुमाराग्र नंदीनी पेठे फक्त रूपने विषे आसक्त छे दृष्टि जेनी एवो पुरुष, नथी जाणतो उना टाढाने के, नथी सांभलतो सारा खोटा कहेला वचनने, नथी ओलखी शकतो सुगंधने के दुर्गंधने के, नथी पारखी शकतो रसोने, माटे ते एकेंद्रियवाला पुरुषने सर्पादिकमां खोटी अथवा माताना धर्मादिकमां सारी बुद्धि क्यांथी होय ? अर्थात् नज होय.

(शालिनीवृत्तम.)

आस्तां सत्यं रूपमालेख्यबिंब–

स्यालोकेऽपि क्लेश एवातिरागात् ॥
सुज्येष्टा श्रीश्रेणिकक्ष्मापवत्स्यात्,
नैणश्रांतिर्भ्रांतिवारीक्षणात्किम् ॥ ९७ ॥

आस्तामिति । सत्यं रूपं आस्तां तिष्टतु । स्त्रियः सत्यरूपविलोकनान्मनोविकारकरणे का वार्ता । परंतु आलेख्यार्विबस्य चित्रीतरूपस्य आलोकेऽपि दर्शनेऽपि सति अतिरागात् अतिरागदर्शनात् क्लेश एव स्यात् । किमिव । सुज्येष्टा श्रीश्रेणिकक्ष्मापवत् । यथा सुज्येष्टा चेटकराजपुत्री श्रीश्रेणिकराजस्यालेख्यचित्रपटरूपावलोकेऽपि अतिरागात् क्लेशभागेव आसीत् ॥ दृष्टांतमाह । भ्रांतिवारीक्षणात् व्यलीकपानीयदर्शनात् एणस्य मृगस्य श्रांतिः श्रमो एणश्रांतिः मृगश्रमः किं न स्यात् । अपि तु श्रम एव स्यात् ९७

सत्य रूप तो दूर रहो, परंतु आलेखेलुं रूप जोवाथी पण अत्यंत अनुरागने लीधे सुज्येष्टाने श्रेणिकराजानुं रूप जोवाथी थयो तेम क्लेशज थाय छे. दृष्टांत कहे छे के, झांझवानां जल जोवाने लीधे भमवाथी शुं हरिणने थाक नथी लागतो ? अर्थात् लागे छे. ॥९७॥

हवे बे काव्यथी रसद्वार कहे छे

(शार्दूलविक्रीडितवृत्तम्.)

रुक् पथ्यं च रसैर्यथा बहुतया संसेवितैर्लोलुपै-
धीरैर्यद्विधिना भवेदपि तथा संसारमोक्षावपि ॥
यन्नानारसलालसः स मथुरामंगुर्भवं भ्रांतवान्,

यत्तीर्णश्च स ढंढणःसममघैः सन्मोदकक्षोदकः॥९

रुगिति । लोलुपैः अतितृष्णाशीलैः पुरुषैः बहुतया उ
संसेवितैः भक्षितैः रसैः कृत्वा यथा रुक् व्याधिः भवेत्। च
यद्यस्मात्कारणात् विधिना संसेवितैः रसैर्यथा पथ्यं हितं भवेत्त
संसारमोक्षौ भवेताम् । दृष्टांतद्वयमाह । यत्रस्मात्कारणात् नाना
मलालसः नानाविधरसलोलुपः सः प्रसिद्धः मथुरामंगुनामाचार्य
भवं संसारं भ्रांतवान् बभ्राम । च अघैः पापैः समं सार्द्धं सन्मो
दकक्षोदकः प्रधानमोदाकानां चूर्णकर्ता स प्रसिद्धः ढंढणः भ
संसारं तीर्णः ततार ॥ ९८ ॥

लोलुपी पुरुषोए बहु रीते सेवन करेला रसथी जेम रोग
थाय छे अने धीर पुरुषोए विधि प्रमाणे सेवन करेला रसथी आ
पथ्य थाय छे. तेवी रीते संसार अने मोक्षनुं पण जाणवुं. जुओ
नाना प्रकारना रसमां प्रीतिवाला मथुरामंगु आचार्ये संसारने विषे
भ्रमण कर्युं अने पापसहित उत्तम एवा मोदकनुं चूर्ण करनार
ढंढण मुनि संसारने तरी गया ॥ ९८ ॥

किं जेयो रसनेंद्रियेण स महान् यः सत्वरक्षारुचि-
र्येनःकर्मरुचिः कुटुंबकमपि पक्वान्नवद्भक्षयन् ॥
किं वा विश्वहिताय नोदरगतं सिंधुर्दधौ वाडवं,
सारग्राहिसुरास्तमाशु न विषं किं नीलकंठः पपौ९

किमिति । स महान् पुरुषः रसनेंद्रियेण कृत्वा किं जेयः स्या-
त् अपि तु न जीयते । स कः । यः सत्वरक्षारुचिः सत्वानां प्राणि-

नां रक्षायां पालने रुचिर्यस्य स तथा । यद्वत् यथा धर्मरुचिर्महात्मा पक्वाम्रवत् पक्वाम्रफलवत् कुतुंबकमपि कटुतुंबकमपि भक्षयन् सन् किं रसनेंद्रियेण जेय आसीत् अपि तु न जेयो बभूव । दृष्टांतमाह । सिंधुः समुद्रः विश्वहिताय त्रैलोक्यमंगलाय उदरगतं जठरमध्यस्थितं वाडवं वडवानलं किं न दधौ न धारयामास अपि तु दधावेव । सारग्राहिसुराः सारग्राहिणश्च ते सुराश्च तथा देवाः सारग्राहिणः जाताः नीलकंठ ईश्वरस्तं विषं आशु शीघ्रं किं न पपौ अपि तु विश्वहिताय विषमपि पपावेव ॥ ९९ ॥

जीवरक्षा उपर रुचि छे जेनी एवो महापुरुष शुं जीव्हा इंद्रि यथी जीतार खरो ? जूओ जीवरक्षा उपर रुचि धरनारा धर्मरुचि मुनि कडवा तुंबडाने पण पाकेला आम्रफलनी पेठे भक्षण करी गया. दृष्टांत कहे छे के. विश्वना हितने अर्थे शुं समुद्रे वडवाग्निने पोताना उदरमां नथी राख्यो ? अथवा सार वस्तुने ग्रहण करनारा देवताओए स्वर्गे दीधेलु विष शुं शिवे नथी पान कर्युं ? अर्थात् जगतना हितने माटे समुद्रे वडवाग्निने धारण कर्यो छे अने शंकरे विषनु पान पण कर्यु छे ॥ ९९. ॥

हवे दे पारवधी गुणकार वरे छे.

स्याद्बंधोऽपि यतस्ततोऽप्यधिगतः क्लेशाय नाशाय वा.
तत्त्राणाक्षयधियातुरः श्रुतिसगान्संत्री सुबंधुर्न किम् ॥
पश्य क्लिश्यति पुष्पनीरसहृतः सर्पः सदर्पोऽपि सन्.
सायं चांबुजकोशबंधनमलिः प्राप्नोति गंधातिवृद्ध् ॥ १००

स्यादिति । गंधोऽपि यतस्ततोऽपि स्थानात् अधिगतः सन् क्लेशाय नाशाय वा स्यात् । तत्तस्मात् सुबंधुर्मंत्री यातुरः चाणाक्यबुद्ध्या पीडितः सन् श्रुतं कर्णगोचरं किं न अपि तु श्रुत एव । दृष्टांतमाह । यश्य विलोकय सदर्पोऽपि सगर्वोऽपि सर्पः पुष्पसौरभहृतः पुष्पपरिमलगतः सन् क्लिश्यति क्लेशं प्राप्नोति गारुडिकबंधनं लभते, अलिर्भ्रमरश्च गंधातितृट् परिमललोभी सन् सायं संध्यायां अंबुजकोशबंधनं कमलकोशबंधनं प्राप्नोति ॥१००॥

ज्यां त्यांथी आवेलो एवोय पण गंध, दुःख तथा नाशने अर्थे थाय छे. चाणाक्यनी बुद्धिवडे क्लेश पामेलो मंत्री सुबंधु शुं तमारा सांभलवामां नथी आव्यो ? दृष्टांत कहे छे के, जूओ, अहंकारयुक्त एवो सर्प पण पुष्पना सुगंधने विषे आशक्ति करवाथी गारुडीथी बंधन पामी क्लेश पामे छे अने सुगंधनी अति तृष्णावालो भ्रमर सायंकाले कमलकोशरूप बंधनमां पडे छे. ॥ १०० ॥

विस्रैर्धातुभिरंगमेतदघटि प्रागेव तत्राप्यहो,
दुर्गंधः प्रतिकर्मणापि हि बहिः प्राक्कर्मतः केचन॥
दुर्गंधेव मृगातनुजवदतः सौरभ्ययत्नोऽत्र को,
गंधद्रव्यचयैर्निबोधशुचिता का नीलिकाभाजने॥१०१॥

विस्रैरिति । प्रागेव पूर्वमेव विस्रैर्दुर्गंधैर्मज्जास्तिरुधिरशुक्रादिभिः सप्तभिर्धातुभिः कृत्वा एतदंगं शरीरमघटि घटितं । तत्रापि शरीरे अहो इत्याश्चर्ये बहिः प्रतिकर्मणापि उद्वर्त्तनमंडनादिप्रकारेणापि केच न प्राक्कर्मतः पूर्वभवोपार्जितकर्मणा दुर्गंधः स्यात् । कस्मि

व । दुर्गंधेन मृगानुजवच्च. यथा तयोः बहिःप्रतिकर्मणापि दुर्गंधो बभूव । अतः कारणात् अत्र शरीरे कः सौरभ्ययत्नः । कैः कृत्वा । गंधद्रव्यचयैः कर्पूरकस्तुरिकादिसुगंधद्रव्यवस्तुसमूहैः ॥ दृष्टांतमाह ॥ नीलिकाभाजने गुलिकाभांडे निर्बोधबुद्धिना स्वभाविकीपवित्रता का स्यात् अपितु न ॥ १०१ ॥

प्रथम आ शरीरज दुर्गंधि धातुओथी बनेलुं छे आश्चर्य छे के ते शरीरने विषे बहार धोवुं वस्तुनि विगेरे अगराग लगाववु विगेरे. प्रतिकर्म करता छता पण बेहु पूर्व कर्मने लीधे दुर्गंधी अने मृगापुत्रनी पेठे नहि दूर थइ शके. पण दुर्गंधज रहेलो छे माटे पण शरीरने सुगंधी पदार्थोथी सुगंधीयात् करवानो शो प्रयत्न करवो? दृष्टांत कहे छे के गळीना पात्रने विषे स्वभाविकी पवित्रता क्यांथी होय? ॥ १०१ ॥

हवे बे काव्यथी स्पर्शेन्द्रिय कहे छे

(वसंततिलकावृत्तम्)

स्पर्शातिगृध्नुरिति वल्यपि याति दुःखं.
प्रद्योतभूप इव संस्पर्शेन रक्तः ॥
यो नाङ्गलीम्पितिसिलेव न केवलेषु—
स्पर्शादिभिः [illegible] ॥ १०२ ॥

[illegible]

प्रद्योतभूप इव स्पर्शलोलुपः चंडप्रद्योतभूपतिः यथा । दृष्टांतमाह । चेद्यदि इभो हस्ती करेणुस्पर्शांधधीः हस्तिनीस्पर्शांधबुद्धिः सन् स्थगितगर्तगतः प्रच्छन्नगर्त्तमाप्तो नाभविष्यत् तर्हि इभं हस्तिनं कोऽग्रहीष्यत् अपि तु न कोऽपि. ॥ १०२ ॥

अत्यंत बलवान् एवो पण प्राणी स्पर्श इंद्रियने विषे घणो इच्छातुर थयो छतो अभय कुमारे बंधनमां नाखेला चंडप्रद्योतन राजानी पेठे दुःखी थाय छे. दृष्टांत कहे छे के, हाथणीनो स्पर्श करवामां आंधली बुद्धिवाळो हाथी जो ढांकी राखेला खाडाने विषे न पडतो होय तो तेने कोण पकडी शके ? ॥ १०२ ॥

य: स्पर्शसौख्यलवमिच्छति मूढबुद्धिः ।
सिद्धिप्रदेन तपसा सुकुमालिकेव ॥
चिंतामणेः सकलभूतलराज्यदातु-
र्बालः स भृष्टचणकान् वृणुते क्षुधार्तः ॥१०३॥

यः स्पर्शेति । यो मूढबुद्धिः स्यात् स पुरुषः सिद्धिप्रदेन सिद्धिदायकेन तपसा कृत्वा स्पर्शसौख्यलवं स्पर्शसुखलेशं इच्छति नान्यः । केव । सुकुमालिका इव । यथा तया बहुविटभुज्यमानवेश्यादर्शनात् सिद्धिदायकेन तपसा कृत्वा द्रौपदीभवसंबंधिनिदानं बद्धं । दृष्टांत माह । यः क्षुधार्तः सकलभूतलराज्यदातुः सर्वपृथ्वीसाम्राज्यदायकाच्चिंतामणेः सकाशात् भृष्टचणकान् वृणुते याचते स बालःस्यात् ॥ १०३ ॥

जे मूढबुद्धि पुरुष, सिद्धिने आपनारी एवी तपश्चर्याये करीने कुकुमारीकानी पेठे अल्प एवा पण स्पर्शना सुखनी इच्छा करे छे ते. सकल पृथ्वीना राज्यनी संपत्ति आपनार चिंतामणि पासेथी शेकेला चणाने मागनार मूरख बालक जेवो छे ॥ १०३ ॥

हवे बे काव्यथी सात व्यसनद्वार कहे छे.

(स्रग्धरावृत्तम्.)

निःसत्त्वं निर्दयत्वं विविधविनटनाशौचनाशात्महानी,
अस्वास्थ्यं वैरवृद्धिर्व्यसनफलमिहामुत्रदुर्गत्यवाप्तिः
चौलुक्यक्ष्मापवत्तद्व्यसनविरमणे किं न दक्षा यतध्वं.
जानंतो मांधकूपे पतत चलत मा हन्त्विपाहेःपथा हे ॥

निःसत्त्वमिति । १ द्यूतव्यसनात् निःसत्त्वं दारिद्र्यं स्यात् । २ मांसभक्षणात् निर्दयत्वं निःकरुणत्वं । ३ मद्यपानात् विविधा विनटना विटंबना उपहास्यं कुर्वाणादिका स्यात् । ४ वेश्याभोगात् शौचस्य पवित्रताया नाशः स्यात् अपवित्रता भवतीत्यर्थः । ५ आखेटकात् आत्महानिः ६ चौर्यात् अस्वास्थ्यं व्याकुलत्वं विश्वासरहितत्वं च । ७ परदारसेवनात् वैरवृद्धिर्भवति । इह लोके इदं व्यसनफलं भवति । अमुत्र च परलोके दुर्गत्यवाप्तिः नरकादिः ।

तत्तस्मात्कारणात् हे दक्षा व्यसनविरमणे व्यसनपरित्यागे चौलु
क्ष्मापवत् कुमारपालभूपाल इव किं न यतध्वं किं यत्नं न कु
अपि तु कुरुध्वमेव। जानंतो ज्ञानवंतोऽधकूपे मा पतत। दृष्टिविष
दृष्टिविषसर्पस्य पथा मार्गेण मा चलत मा गच्छत ॥ १०४ ॥

द्यूत रमवाथी निर्धनपणुं, मांसभक्षणथी निर्दयपणुं, मद्यपानथी
विविध विटंबना, वेश्या भोगथी अपवित्रता, मृगयाथी आत्महानि
चोरीथी व्याकुलपणुं अने परस्त्री सेवाथी वैरनी वृद्धि ए सर्व आ
जगत्ने विषे कुव्यसनना फल छे. वली परलोकने विषे तो नरकनी
प्राप्ति एज कुव्यसननुं फल छे, माटे हे दक्षजनो! तमे चौलुक्य
भूपतिनी पेठे ए व्यसननो त्याग करवाने केम नथी यत्न करता?
जाणता छतां अंधारा कूवामां न पडो अने दृष्टिविष सर्पना मार्ग
ने विषे न चालो ॥ १०४ ॥

(शार्दूलविक्रीडितवृत्तम.)

सप्तापि व्यसनानि पापसदनान्येतानि वर्ज्यानि यत्
सत्कर्मापि न शस्यते व्यसनमत्यासेवया स्याद्यथा।
स्नेहोऽर्हत्यपि गौतमस्य गणनाऽकाले च कोशागुणः
ग्लानिः पाग्दभाविते हि कनकेऽरिष्टं फलेऽनार्तव।

पापार्थिके पुंसि सदा भवंति ॥ १ ॥
द्यूताद्राज्यविनाशनं नलनृप प्राप्तोऽथवा पांडवा
मद्यात् द्वारिकानृपश्च यादवपिता पापर्द्धितो दूषितः ॥
मांसाच्छ्रेणिकभूपतिश्च नरके चौर्याद्विनष्टा न के,
वेश्यातः कृतपुण्यको गतधनाऽन्यस्त्रीरतो रावण ॥ २

सप्तापीति । एतानि सप्तापि व्यसनानि पापसदनानि पापस्था- ानि । अतः तानि वर्ज्यानि वर्जनीयानि । यत्रस्मात्कारणात् अ- त्यासेवया अत्याशक्त्या सत्कर्मापि प्रधानकर्तव्यमपि न शस्यते न वर्ण्यते । व्यसनं स्यात् व्यसनमेव कथ्यते । यथा अर्हत्यपि श्री वी- रेऽपि गौतमस्य स्नेहः अत्याशक्त्या व्यसनमेव । च पुनः कोशागुरोः श्री स्थूलभद्रस्य अकाले गणना स्वाध्यायः सत्कर्मापि व्यसनं। दृष्टांता- माह । हि यस्मात् पारदभाविते रसामिश्रिते कनके स्वर्णे ग्लानिः श्यामता स्यात् । अनार्तवे ऋतुं विनोत्पन्ने फले चारिष्टं स्यात्. १०५

आ साते व्यसनो पापना स्थान छे, माटे त्यजवा योग्य छे. कारण के, अति आशक्तिथी सत्कार्य करनारो प्राणी होय तो पण ते वखणातो नथी. ए व्यसने अतिशय सेववाथी दुःख थाय छे. गौतम गणधरनो श्रीवीरप्रभुनी उपरनो स्नेह, ए पण व्यसन छे. स्थूलभद्रनी अकाले गणना ए पण व्यसन छे दृष्टांत कहे छे. पाराथी मिश्रित एवा कनकने विषे श्यामपणुं अने ऋतु विना उत्पन्न थयेलां फलमां अरिष्ट होय छे. ॥ १०५ ॥

हवे वे काव्यथी द्यूतद्वार कहे छे.

द्यूतेनार्थयशः कुलक्रमकलासौंदर्यतेजःसुहृत्-
साधूपासनधर्मचिंतनगुणा नश्यंति संतोऽपि हि।
यद्वत्पांडुसुतेषु तच्युतसुदीप्त्यादित्यभावर्जिते,
विम्बे किं तमसा स्फुटं घटपटस्तंभादि वा लक्ष्यते १०६

द्यूतेनेति ॥ द्यूतेन व्यसनेन अर्थयशःकुलक्रमकलासौंदर्यतेजः-

तत्तस्मात्कारणात् हे दक्षा व्यसनविरमणे व्यसनपरित्यागे चौलु-
क्षमापवत् कुमारपालभूपाल इव किं न यतध्वं किं यत्नं न कुरुत,
अपि तु कुरुध्वमेव। जानंतो ज्ञानवंतोऽधकूपे मा पतत। दृष्टिविषः
दृष्टिविषसर्पस्य पथा मार्गेण मा चलत मा गच्छत ॥ १०४ ॥

द्यूत रमवाथी निर्धनपणुं, मांसभक्षणथी निर्दयपणुं, मद्यपानथी
विविध विटंबना, वेश्या भोगथी अपवित्रता, मृगयाथी आ मरण,
चोरीथी व्याकुलपणुं अने परस्त्री सेवाथी वैरनी वृद्धि ए सर्व
जगत्ने विषे कुव्यसनना फल छे. वली परलोकने विषे तो नरक
प्राप्ति पण कुव्यसननुं फल छे, माटे हे दक्षजनो ! तमे चौलुक्य
भूपतिनी पेठे ए व्यसननो त्याग करवाने केम नथी यत्न करता ?
जाणता छतां अंधारा कुवामां न पडो अने दृष्टिविष सर्पना मार्ग
ने विषे न चालो ॥ १०४ ॥

(शार्दूलविक्रीडितवृत्त.)

सप्तापि व्यसनानि पापसदनान्येतानि वर्ज्यानि यः
सत्कर्मापि न दम्यते व्यसनमप्यासेवया स्यात् ।
संदेहोऽप्यपि गौतमस्य गणनाऽकाले न कोऽप्यागुं
स्थानिः पादभाविनि हि कनकेऽपिदं फलं ज्ञानां ।

[illegible] ॥ १ ॥
[illegible]
[illegible]
[illegible]
[illegible]

समापीनि । एतानि सप्तापि व्यसनानि पापस्थानानि पापस्थानानि । अतः तानि वर्ज्यानि वर्जनीयानि । यत्रस्मात्कारणात् अत्यासेवया अत्यासक्त्या सत्कर्मापि प्रधानकर्तव्यमपि न शस्यते न वर्ण्यते । व्यसनं स्यात् व्यसनमेव कथ्यते । यथा अर्हत्यपि श्री वीरेऽपि गौतमस्य स्नेहः अत्याशक्त्या व्यसनमेव । च पुनः कोशागुरोः श्री स्थूलभद्रस्य अकाले गणना स्वाध्यायः सत्कर्मापि व्यसनं।दृष्टांतमाह । हि यस्मात् पारदभाविते रसामिश्रिते कनके स्वर्णे म्लानिः श्यामता स्यात् । अनार्तवे ऋतुं विनोत्पन्ने फले चारिष्टं स्यात्.१०५

आ साते व्यसनो पापना स्थान छे, माटे त्यजवा योग्य छे कारण के, अति आशक्तिथी सत्कार्य करनारो प्राणी होय तो पण ते वखणातो नथी ए व्यसनो अतिशय सेववाथी दुःख थाय छे. गौतम गणधरनो श्रीवीरप्रभुनी उपरनो स्नेह, ए पण व्यसन छे. स्थूलभद्रनी अकाले गणना ए पण व्यसन छे. दृष्टांत कहे छे पाराथी मिश्रित एवा कनकने विषे श्यामपणु अने ऋतु विना उत्पन्न थयेलां फलमां अरिष्ट होय छे. ॥ १०५ ॥

हवे बे काव्यथी द्यूतद्वार कहे छे.

द्यूतेनार्थयशः कुलक्रमकलासौंदर्यतेजःसुहृत्-
मावूपासनधर्मचिंतनगुणा नश्यंति संतोऽपि हि।
यद्वत्पांडुसुतेषु तद्युतसुदीप्त्यादित्यभावर्जिते,
विश्वे किं तमसा स्फुटं घटपटस्तंभादि वा लक्ष्यते १०६

द्यूतेनेति ॥ द्यूतेन व्यसनेन अर्थयशःकुलक्रमकलासौंदर्यतेजः-

पोऽपि राज्यसुखान्निरस्तो भ्रष्टःसन् रोर इव दरिद्र इव जानीत.१०७

हे प्राणीयो ! तमे द्यूत केम त्यजता नथी ? पोताना घरने शा माटे वालो छो ? अने पोताना मुखमां वकराने शा माटे मूतरावो छो ? कारण तमे जाणो छो के, ए द्यूतने लीधेज नलराजा तेवी पोतानी प्रिया दमयंती सहित राज्यथी भ्रष्ट थइ दरिद्रीसरखो थयो.१०७

हवे वे काव्यथी मांसद्वार कहे छे.

मांसाशनान्नरक एव ततः स देव–
स्तल्लोलुपं हरिनृपं कृतवान् सरोषः ॥
किं पाकपेशलतराशनदत्ततृष्णे,
किंपाकभोजिनि मृतेरपि संशयोऽस्ति ॥ १०८॥

मांसेति । मांसस्य अशनं भक्षणं तस्मात् नरक एव स्यात् ततः स देवः तल्लोलुपं मांसलोभिनं हरिनृपं हरिवंशकर्तारं राजानं कृतवान् चकार। कथंभूतः देवः। सरोषः पूर्वभवबद्धवैरः। दृष्टांतमाह। किंपाकं विषवृक्षफलं तद्भक्षितुं इत्येवं शीलं यस्येति किंपाकभोजी तस्मिन् पुरुषे मृतेरपि मरणादपि किं संशयोऽस्ति अपि तु न किंतु म्रियते एव । किं रूपे किंपाकभोजिनि । पाकेन परिपक्वतया पेशलतरं मनोज्ञतमं यदशनं भोजनं तत्र दत्ततृष्णे कृतलोभे । यथा परिपक्वफलं भुंक्ते तथा विषवृक्षफलं यदि भुंक्ते तर्हि तस्य पुरुषस्य मरणादपि किं संशयः अपि तु न ॥ १०८ ॥

मांस भक्षण करवाथी नरकज मले छे ? अने तेटलाज माटे

हवे बे काव्यथी मद्यद्वार कहे छे.

नाकृत्यकृत्यविदलं मधुपानमत्तो-
भूताभिभूत इव शून्यमनोवचोंगः ॥
किं देवकीपरिणये मदपारवश्या-
न्नाश्लेषि जीवयशसाप्यतिमुक्तकर्षिः ॥११०॥

नेति। मधुपानमत्तः पुरुषो भूताभिभूतः पुरुष इव अकृत्यं कृत्यं वा वेत्तीति ईदृशोऽलमसमर्थो न स्यादेव। किंरूपः। शून्यमनोवचोंगः शून्यानि मनोवचोंगानि यस्य स तथा॥ दृष्टांतमाह। अहो इत्याश्चर्ये देवकीपरिणये देवकीविवाहावसरे मदपारवश्यात् मद्यपानमदोन्मत्ततया जीवयशसा अतिमुक्तकर्षिः अतिमुक्तकनामा ऋषिरपि किं नाश्लेषि किं नालिंगितः। अपि तु आलिंगित एव मदपारवश्यात्॥ ११० ॥

मद्यपानथी मत्त थयेलो पुरुष मन वचन अने कायावालो शू[illegible] [illegible] भूत प्रेतादिकथी पराभव पामेलो होय [illegible] [illegible] [illegible] जाणतो नथी. दृष्टांत कहे छे. देवकीना वि[illegible]प्रसंगे मद्यपानथी परवश थयेली जीवयशाए शुं अतिमुक्त मु[illegible] आलिंगन नहोतुं कर्युं । ११० ।

(मालिनीवृत्तम्)

मधु मधुरवचोभिः प्रेयसीप्रेरितो यः
पिबति निजकुलोपं वालिनीनां दिशन् ॥

वररुचिवदिहापि प्रेक्षते दुर्गतिं सः,
क्व च तनुदृढता स्याद्भोगिभुक्ताज्यभोगैः॥१११॥

मधु इति । मधुरवचोभिः मिष्टवचनैः कृत्वा प्रेयसीप्रेरित क' लत्रनोदितः सन् यः पुरुषो मधु मद्यं पिबति आस्वादति । किं कृत्वा । निजकुलोत्थां निजकुलोत्पन्नां चारुचितां प्रधानविचारं विमुच्य संत्यज्य । स पुरुषो वररुचिवत् वररुचिपंडित इव इहापि इहलोकेऽपि दुर्गति नरकं प्रेक्षते पश्यति । अत्र दृष्टांतमाह । भो' गिभुक्ताज्यभोगैः सर्पखादितघृतभोजनैः तनुदृढता शरीरदृढता क्व च स्यात् अपि तु न ॥ १११ ॥

मधुर वचनोए करीने प्रियाये प्रेरेलो जे पुरुष पोताना कुलाचारनी उत्तम चिताने त्यजी दइने मद्यपान करे छे ते पुरुष, वररुचिनी पेठे आ लोकमां पण दुर्गतिने जूए छे. दृष्टांत कहेछे के, सर्पे बो टेला एवा घीने खावाथी शरीरनी दृढता क्यांथी थाय ? ॥१११॥

हवे बे काव्यथी वेश्याद्वार कहे छे.

(शार्दूलविक्रीडितवृत्तम्.)

वेश्या विश्वकलत्रमत्र तदहो पानीयशालाजले,
यद्वत्कांदविकाशने च शुचिता का प्रायशस्तादृशी।
तस्मात्सा कृतपुण्यवत् कृतकमुच्छोकोदया किं प्रिया
पूर्णेऽलं विशदा स्वभावकलुषा दोषापि नंदौ कृशे॥

वेश्येति। वेश्या गणिका विश्वकलत्रं समस्तपत्नी तत्तस्मात् कारणात् अत्र वेश्यायां प्रायशो बाहुल्येन तादृशी शुचिता पावि-त्र्यं का। अपि तु न कापि। अहो इत्याश्चर्ये पानीयशालाजले पर्वसत्कजले यद्वत् यथा शुचिता न भवति यथा च कांदवि-कस्याशने भोजने प्रायः तादृशी पवित्रता न स्यात्। तस्मात् का-रणात् सा वेश्या पुरुषस्य किं प्रिया वल्लभा स्यात्। अपि तु प्रिया न स्यात्। किं विशिष्टा सा वेश्या॥ कृतकमुच्छोकोदया कृतकः कृतो मुदो हर्षस्य शोकस्य च उदयो वृद्धिर्यया सा तथा। किंवत्। कृतपुण्यवत् यथा कृतपुण्यस्य वेश्या प्रिया नासीत्। बहुकालं भु-क्ता दत्तबहुद्रव्यापि वेश्या वल्लभा न भवतीत्यर्थः। दृष्टांतमाह। पूर्णे षोडशकलासंपूर्णे वा कृशे दुर्बले न्यूने इंदौ चंद्रमसि सति दोषापि रात्रिरपि अलं अत्यर्थं विशदा निर्मला न भवति। अत्र-मन्ये हेतुगर्भितविशेषणमाह। स्वभावकलुषा स्वभावेनैव सहजे-नैव कलुषा सकश्मला समलिना। यथा रात्रिः संपूर्णेऽपि कृशेऽपि च चंद्रमसि वर्त्तमाने सति विशदा नैव भवति। किंतु कलुषैव भव-ति तथैव वेश्यापि बहुकालं सेवितापि नानाविधद्रव्यादिना तो-षितापि प्रिया नैव स्यादिति॥ ११८॥

[illegible]

लावालो होय तो पण स्वभावथीज मलीन एवी रात्री शुं अत्यंत निर्मल थाय खरी ? अर्थात् नज थाय ॥ ११२ ॥

(मालिनीवृत्तम्.)

क लघुनि गणिकानां हृद्यनेके गवाक्षा
दधति यदनुवेलं ता रसं नव्यनव्यम् ॥
तदजनि हतवृत्तः कूलवालोऽपि ताभि-
र्गलति हिमगिरिर्वा भानुभाभिर्दृढाभिः ॥११३॥

केति । गणिकानां वेश्यानां लघुनि तुच्छे हृदि हृदये अनेके गवाक्षाः छिद्राः । लोकभाषया गोखला इति । क कुतः अभूवन् यद्यस्मात्कारणात् ता गणिका अनुवेलं वेलां अनु लक्षीकृत्य नव्यनव्यं नवीनं नवीनं रसं शृंगारं दधति धारयंति । तत्तस्माद्धेतोः कूलवालो मुनिरपि मासक्षपणादिमहातपःकर्तापि ताभिर्गणिकाभिः हृतवृत्तः चौरिताचारो भ्रष्टचारित्रोऽजनि जातः । अस्यां वार्तायां दृष्टांतमाह । वा दृष्टांतदर्शने । हिमगिरिर्हिमाचलो दृढाभिस्तीव्राभिः भानुभाभिः सूर्यकांतिभिः गलति द्रवीभवति । तथा वेश्यानां हावभावैर्मोहितचितः पुरुषः कृत्याकृत्यं न वेत्तीत्यर्थः ॥ ११३ ॥

वेश्याओना हलका हृदयने विषे अनेक छिद्रो क्यांथी थया ? कारण के, ते दरेक वखते नवनवा रसने धारण करेछे एवी वेश्याओथीज मासक्षमणादि महातप करनारा कुलवालक मुनि व्रतभ्रष्ट थया. दृष्टांत कहे छे के, सूर्यनी तीक्ष्ण कांतिथी हिमाचल पर्वत पण गले छे. अर्थात् वेश्याना हावभावथी मोह पामेलो पुरुष कृत्य अने अकृत्यने जाणतो नथी ॥ ११३ ॥

हवे बे काव्यथी पापर्द्धिद्वार कहे छे.

(शार्दूलविक्रीडितवृत्तम्.)

व्याधो नान्यहिताय सत्यमसकृद्विश्वस्तजंतूंस्तुदन्,
न स्वस्मिन्नपि तुष्टये च्युतशरक्रोडादितोंतं व्रजन् ॥
मृत्यौ दुर्गतिमाप्नुवांश्च मृगया लोकद्वयार्त्यै ततो,
गांगेयेन स शांतनुक्षितिपतिस्तस्या निषिद्धस्ततः॥११४

व्याधेरिति। व्याधः आखेटकी अन्यहिताय न स्यादिति सत्यं। स्वस्मिन्नपि आत्मन्यपि तुष्टये संतोषाय न भवतीत्यर्थः। किं कुर्वन्। असकृद्वारं वारं विश्वस्तजंतून् विश्वासप्राप्तजीवान् तुदन् मारयन्। च्युतशरक्रोडादितः लक्षभ्रष्टशूकरादितः अंतं विनाशं व्रजन् गच्छन्। पुनः किं कुर्वन्। मृत्यौ मरणे सति दुर्गतिं नरकं परलोके आप्नुवांश्च प्राप्नुवंश्च। परहिताय स्वहिताय च न स्यादित्यर्थः। ततः कारणात् मृगया आखेटको लोकद्वये इहलोकपरलोकयोः अर्त्यै पीडायै स्यात्। ततः हेतो स प्रसिद्धः शांतनुक्षितिपतिः शांतनुनृपः गांगेयेन तस्याः मृगयायाः सकाशात् निषिद्धो निवारित इति ॥ ११४ ॥

ए सत्य छे के विश्वास पमाडेला प्राणीओने वारंवार मारी नाखतो एवो पारधी अन्यना हितने अर्थे नथी एटलुंज नहि पण बाणना प्रहार चुकी गयेला सूवरादि प्राणीओथी मृत्यु पामतो ते पारधी पोते पोतानी तुष्टिने अर्थे पण थतो नथी वाग्ल के मृत्यु थवा ˆ ˋ पोते पण दुर्गतिने पामे छे आ प्रमाणे मृगया ५

हवे बे काव्यथी परस्त्रीद्वार कहे छे.

पुण्यापुण्यचयेन बुद्धिरमला स्यात् कश्मलाप्यंगिनां,
वातेनेव युगंधरी सदसता मुक्ताफलांगारभा ॥
लंकेशो नलकूबरप्रियतमां नाम्नोपरंभां रता-
मत्याक्षीदरतां च रामवनितां सीतां जहाराशु यत् ॥

पुण्येति । अंगिनां प्राणिनां बुद्धिः पुण्यापुण्यचयेन धर्माधर्मयोर्वृद्धिप्रकारेण पुण्यचयेन अमला निर्मला अपुण्यचयेन कश्मला कलुषी स्यात् । किदृशी स्यादित्याह । युगंधरी सदसता शोभनाशोभनेन वातेन वायुना मुक्ताफलांगारभा मुक्ताफलांगारसमानकांतिरिव । यथा शोभनेन वायुना युगंधरी मुक्ताफलाभा स्यात् असता विरूपकेन वायुना युगंधरी अंगारसदृशा स्यात् ॥ दृष्टांतमाह । लंकेशो रावणो रतां सानुरागां नलकूबरप्रियतमां नलकूबरकलत्रं नाम्ना अभिधानेन उपरंभां अत्याक्षीत्। तत्र धर्मोदयेन रावणस्य निर्मला बुद्धि रासीत्। च पुनः स एव लंकेशोऽरतां नीरागां यद्यस्मात्कारणात् पापोदयात् रामवनितां श्रीरामकलत्रं सीतामाशु शीघ्रं जहार अहरत् ॥ ११८ ॥

पुण्यना संचयथी प्राणीनी बुद्धि निर्मल थाय छे अने पापना संचयथी मलीन थाय छे जूओ के. युगधरी-जार सारा वायुए करीने मुक्ताफल सरखी कांतिवाली थाय छे अने नठारा वायुथी अंगारना सरखी कांतिवाली थाय छे दृष्टांत कहे छे के रावणे पोताने विषे आसक्त एवी नल कूबरनी प्रियाने धर्मना उदयथी तजी दी। [illegible] रक्त नहि एवी सीताने पापना उदयथी शीघ्र हरण [illegible]

कषायदवपावके विषयवात्ययादीपिते ॥
महद्गुणवनं दहत्यहह पुण्यकल्पद्रुम-
स्ततोऽस्ति यदि दैवतः शमघनाघनो वर्षति? २०

सुभूमेति। अहहेति खेदे। महद्गुणवनं महतां गुणा एव वनं दहति भस्मीभवति। क्व। सुभूमनामा चक्रवर्ती जमदग्निजः परशुरामः तयोः प्रतिमाः सदृशाः पुंद्रुमाः पुरुषद्रुमास्तेषामावर्षः संघट्टस्त-स्माज्जातस्तस्मिन्। कषाय एव दवपावको दावानलस्तत्र। किंरूपे। विषया शब्दरूपरसगंधस्पर्शाः पंच त एव वात्यया वात-समूहस्तया उद्दीपिते प्रज्वालिते। ततः तस्मिन्नुपशमे महद्गुणवने य-दि दैवतो भाग्यवशात् शम उपशम क्षमा स एव घनाघनो मेघो व-र्षति वृष्टिं करोति तर्हि पुण्यकल्पद्रुमोऽस्ति वर्त्तते ॥ १२० ॥

आहना सुभूम चक्रवर्ती तथा परशुराम जेवा पुरुष रूप वृ-क्षाना घसाराथी उत्पन्न थयेला अने पंच विषय रूपी वायुए प्रदी-प्त करेला एवा कषाय रूपी दवाग्निने विषे महा गुण रूपी वन ब-ली जाय छे ते वखते जो दैवयोगे शमता रूप मेघ वरसे तो पुण्यरूप कल्पवृक्ष त्यां रहे ॥ १२० ॥

जीवाः कषायविवशा न विचारयंति,
चाणाक्यवत्किमपि कृत्यमकृत्यमत्र ॥
कल्पांतवातवितति क्षुभितस्य पूर्ण-
[illegible] जलधेर्ननु को विवेकः ॥ १२१ ॥

घुरं मोदकादिकं सरसमाहारं भुंक्ष्व भक्षय। हृद्यं मनोज्ञं कर्पूरएलावासितं जलमपि पानीयमपि पिब। च पुनः तान् प्रसिद्धान् स्वादिमादि षड्रसान् मा रुंद्धि। कायक्लेशं शरीरकष्टं त्यज मुंच। अंगं शरीरं विमलय प्रक्षालय जलादिना। क्रूरकुंभर्षिणोक्तः क्रूरकुंभर्षिणा प्रोक्तः मोक्षोपायः मोक्षगमनप्रकारः सुकरः सुखेनकर्तुं शक्योऽस्ति। उपायं दर्शयति। कोपं जय शिवजं मोक्षोत्पन्नं शर्म सुखं भज आश्रय। दृष्टांतमाह। द्राक्षा हारहूरा। इक्षुः प्रसिद्धः। क्षीरं पयः। खंडः शर्करा प्रभृतिरसबलात् प्रमुखरससामर्थ्यात् अदुष्टं यथा स्यात् तथा संनिपातोऽमलो भवति॥ १२२॥

हे साधु! मनोहर एवा मिष्टांननुं भोजन कर. जलपान कर. छ प्रकारना रसनो अनुभव ले कायक्लेशनो त्याग कर, अंग निर्मल कर. परंतु क्रूरकुंभ मुनिए मोक्षनो सहेलो उपाय बताव्यो छे ते ए जाणजे के. फक्त क्रोधनो पराजय कर एटले मोक्षसुख प्राप्त थशे. दृष्टांत कहे छे के द्राख शेरडीनो रस. दुध अने साकर ए सर्व रसबलने लीधे एकठु थाय तो पण खराब थतुं नथी. १२२

(मालिनीवृत्तम्.)

यदि शिवगतिरिष्टा सार्यसेतार्यवत्त-
ज्जय रुषमुपसर्गेऽपीप्सिता दुर्गतिश्चेत्॥
करडकुरुडवत्तत्क्रोधसुत्रैर्विधेहि.
सुरतरुकनकक्ष्मायो मतस्तं भजस्व॥ १२३॥

यदीति। यदि ना प्रसिद्धा शिवगतिः मोक्षगतिः इष्टा वल्ल-

धुरं मोदकादिकं सरसमाहारं भुंक्ष्व भक्षय। हृद्यं मनोज्ञं कर्पूरएलावासितं जलमपि पानीयमपि पिब। च पुनः तान् प्रसिद्धान् स्वादिमादि षड्रसान् मा रुंद्धि। कायक्लेशं शरीरकष्टं त्यज मुंच। अंगं शरीरं विमलय प्रक्षालय जलादिना। कूरकुंभर्षिणोक्तः कूरकुंभर्षिणा प्रोक्तः मोक्षोपायः मोक्षगमनप्रकारः सुकरः सुखेनकर्तुं शक्योऽस्ति। उपायं दर्शयति। कोपं जय शिवजं मोक्षोत्पन्नं शर्म सुखं भज आश्रय। दृष्टांतमाह। द्राक्षा हारहूरा। इक्षुः प्रसिद्धः। क्षीरं पयः। खंडः शर्करा प्रभृतिरसबलात् प्रमुखरससामर्थ्यात् अदुष्टं यथा स्यात् तथा संनिपातोऽमलो भवति ॥ १२२ ॥

हे साधु ! मनोहर एवा मिष्टांननुं भोजन कर. जलपान कर. छ प्रकारना रसनो अनुभव ले कायक्लेशनो त्याग कर, अंग निर्मल कर परंतु कूरकुंभ मुनिए मोक्षनो सहेलो उपाय बताव्यो छे ते ए जाणजे के फक्त क्रोधनो पराजय कर एटले मोक्षसुख प्राप्त थयुं दृष्टांत कहे छे के द्राख शेरडीनो रस. दुध अने साकर ए सर्व रसबलने लीधे एकठुं थाय तो पण खराब थतुं नथी. १२२

(मालिनीवृत्तम्.)

यदि शिवगतिरिष्टा सार्यमेतार्यवत्त-
ज्जय रुदमुपसर्गेऽपीप्सिता दुर्गतिश्चेत् ॥
करडकुरडवत्तक्रोधमुच्चैर्विधेहि.
सुरतरुकनकद्रोर्यो मतस्तं भजस्व ॥ १२३ ॥

टी०। यदि सा प्रसिद्धा शिवगतिः मोक्षगतिः इष्टा

तारकनामा दैत्यः शंभुशिशुना कार्तिकेयेन हृतसर्वगर्वः हृतोऽपहृतः सर्वः समस्तो गर्वोऽहंकारो यस्य स तथा ईदृशः किं नाकारि अपि तु कृत एव ॥ १२४ ॥

जेम वेश्याये करेला उपहासने लीधे नंदिषेण मुनि तप श्रुतादिकथी भ्रष्ट थया तेम अभिमानी माणस तप, श्रुत, शम, व्रत अने धर्म रहित थाय छे दृष्टांत कहे छे के, ब्रह्माना वरदानथी दुर्जय एवा तारकासुरने शुं शंभुपुत्र कार्तिकस्वामीये गर्वरहित नथी कर्यो ?

स्वस्यापरस्य च बलान्यविचिंत्यमानः,
शक्राभ्यमित्रचमरेंद्रवदापदे स्यात् ॥
शुक्रःकदाचिदिह चेत्तनुते प्रकाश-
लेशं ततः स्थगयतींदुमहो महत्किम् ॥१२५॥

स्वस्येति। स्वस्य आत्मीयस्य अपरस्य च बलानि अविचिंत्यमानः अनवधारयमानः सन् आपदे कष्टाय स्यात्। किंवत्। शक्राभ्यमित्रचमरेंद्रवत् । शक्र इंद्रस्तं प्रति प्रस्थितशत्रुचमरेंद्रवत् । दृष्टांतमाह। चेद्यदि शुक्रो दैत्यगुरुरिह जगति कदाचित् प्रकाशलेशं कांतिलवं तनुते विस्तारयति ततस्तर्हि महत् गरिष्ठमिंदुमहः चंद्रकांतिः किं स्थगयति किं आच्छादयति अपि तु न स्थगयति १२५

पोताना अने परना बलनो विचार नहि करनारो माणस शक्रेंद्रनी सामा युद्ध करवा गयेला शत्रु चमरेंद्रनी पेठे दुःखी थाय छे दृष्टांत कहे छे के, शुक्रनो तारो आ लोकमां कंइ प्रकाश करे, तो तेथी ते शुं चंद्रना म्होटा तेजने ढांकी शके खरो ? ॥ १२५ ॥

(स्रग्धरावृत्तम्.)

सर्वेऽप्येते कषायाः सदृशबलभृतः किं तु तीव्रैव माया,
जित्वा याऽऽषाढभूतिं नटमिव नटयामास गौरीव रुद्रम् ॥
स्त्रीत्वं स्त्रीलिंगभावादिह नृषु न ददौ मल्लिमुख्येषु या किं.
सत्यं दुर्दांतदैत्यं कपटनुरमणीरूपविष्णुर्जघान ॥१२७॥

सर्वं इति । एते सर्वेऽपि चत्वारोऽपि कषायाः सदृशं समानं बलं सामर्थ्यं बिभ्रतीति सदृशबलभृतः समानबलधारिणः संति । किं तु पुनर्माया तीव्रैव उत्कटैवास्ति । या माया आषाढभूतिनामानं मुनिं जित्वा स्ववशमानीय नटमिव नटयामास विडंबयामास । केव । गौरी पार्वती रुद्रमिव । यथा पार्वती ईश्वरं नर्त्तयति । इह जगति या माया मल्लिमुख्येषु मल्लिनाथतीर्थंकरादिषु नृषु मनुष्येषु स्त्रीलिंगभावात् स्त्रीलिंगबाधात् स्त्रीत्वं किं न ददौ अपि तु स्त्रीत्वं ददौ । दृष्टांतमाह । एतत्कथोक्तं सत्यमेव । कपटकृतरमणीरूपविष्णुः जित- [illegible]

[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

पूर्ण थाय छे? अथवा तो कोटीबंध लाकडां नाखवाथी पण ज्वालाथी विकराल थयो अग्नि शुं शांत थाय छे? ॥ १२८ ॥

(स्रग्धरावृत्तम्.)

चित्तावन्यां जनानां कपिलसमधियां वित्तलेशाशमूलः,
प्रत्याशावारिसिक्तो धनिविविधधनप्रार्थनाभोगवल्गुः॥
भूपेंद्रत्वादिसंपन्मतिकुसुमततिर्भोगचिंताफलर्द्धि-
र्लोभो धृत्यास्रवंत्या व्रजतु कलितरुर्वपुरप्यर्तिहेतुः॥१२९॥

चित्तेति । लोभस्तृष्णा स एव कलितरुः क्लेशवृक्षः व्रजतु गच्छतु नाशं यात्वित्यर्थः । कया नाशं यातु । धृति संतोषः सैवास्रवन्ती नदी तया । किं रूपः । कपिलब्राह्मणस्य समा सदृशा धीर्बुद्धिर्येषां ते कपिलसमधियः तेषां जनानां चित्त एवावनिः पृथ्वी तस्यां वित्तलेशस्य द्रव्यांशस्य आशः आशैव मूलं यस्य स तथा । पुनः किं भूतः । प्रत्याशावारिसिक्तः प्रत्याशयैव वारिणा जलेन सिक्तः सिंचितः । पुनः किं विशिष्टः । धनिनां लक्ष्मीवतां विविधधनप्रार्थना बहुविधद्रव्ययाचा तद्रूपो यो भोगो विस्तारस्तेन वल्गुः प्रधानः। पुनः किं विशिष्टः । भूपत्वं नृपत्वं । इंद्रत्वं देवाधीशत्वं । इत्यादि संपत्तिरेव कुसुमततिः पुष्पश्रेणिर्यत्र स तथा । पुनः किं विशिष्टः । भोगचिंता विषयाभिलाष एव फलर्द्धिः फलसंपत्तिर्यत्र स । पुनः किं विशिष्टः । वपुः शरीरेऽपि अर्तिहेतुः पीडाकारणमिति ॥ १२९ ॥

इति सकल [illegible]

हवे ए काव्यथी लोभद्वार कहे छे.

(शार्दूलविक्रीडितवृत्तम्.)

लोभी तृप्यति नो धनैरपि धनैरिच्छन्नवं स्वं नवा-
दप्याद्यः पितृकल्पितानुजपदं किं वार्पभिर्नाच्छिदत्
अश्रांतं सरितां शतैरपि भृतः किं वांबुधिः पूर्यते,
किं वा शाम्यति काष्टकोटिभिरपि ज्वालाकरालोऽनल

लोभीति । लोभी लोभवान् पुरुषः धनैरपि धनैर्बहुभिरपि द्रव्यै
कृत्वा न तृप्यति न संतोषं याति । कि कुर्वन् । नवान्नवं स्वं द्रव्
इच्छन् वांच्छन् । आद्यः प्रथमः वार्षभिः वृषभस्यापत्यं श्रीआ
दिनाथस्य पुत्रोः भरतः पितृकल्पितानुजपदं पित्रा श्रीआदिनाथे
कल्पितं दत्तं अनुजानां लघुभ्रातृणां बाहुबल्यादीनां पदं राज्यं किं
न आच्छिदत् कि न जग्राह । अपि तु आच्छिददेव । लौकिकदृष्ट
तद्वयमाह । अंबुधिः समुद्रः अश्रांतं निरंतरं सरितां शतैः नदीन
शतसंख्याभिः भृतः पूरितः सन् कि पूर्यते अपि तु न पूर्यते
वा पुनः ज्वालाभिः करालो रौद्रोऽनलोऽग्निः काष्टकोटिभिरपि
कि शाम्यति उपशमं गच्छति अपि तु न शाम्यति ॥ १२८ ॥

नवा नवा द्रव्यनी इच्छा करतो एवो लोभी पुरुष बहु द्रव्य
थी पण तृप्ति पामतो नथी पिताए आपेला न्हानाभाइ बाहुबलि
विगेरेना राज्यने शुं भरत चक्रवतीए नथी छिनावी लीधां? दृष्टांत
कहे छे के, निरंतर शेंकडो नदीयोथी पूरातो एवो पण समुद्र शु

पूर्ण थाय छे ? अथवा तो कोटीबंध लाकडां नाखवाथी पण ज्वालाथी विकराल एवो अग्नि शुं शांत थाय छे ? ॥ १२८ ॥

(स्रग्धरावृत्तम्.)

चित्तावन्यां जनानां कपिलसमधियां वित्तलेशाप्तिमूलः,
प्रत्याशावारिसिक्तो धनिविविधधनप्रार्थनाभोगवल्गुः ॥
भूपेंद्रत्वादिसंपन्मतिकुसुमततिर्भोगचिंताफलर्द्धि-
र्लोभो धृत्याश्रवंत्या व्रजतु कलितरुर्वहुरप्यार्तिहेतुः ॥१२९॥

चित्तेति । लोभस्तृष्णा स एव कलितरुः क्लेशवृक्षः व्रजतु गच्छतु नाशं यात्वित्यर्थः । कया नाशं यातु । धृति संतोषः सैवाश्रवंती नदी तया । किं रूपः । कपिलब्राह्मणस्य समा सदृशा धीर्बुद्धिर्येषां ते कपिलसमधियः तेषां जनानां चित्त एवावनिः पृथ्वी तस्यां वित्तलेशस्य द्रव्यांशस्य आप्तिः प्राप्तिरेव मूलं यस्य स तथा । पुनः किं भूतः । प्रत्याशावारिसिक्तः प्रत्याशैव वारिणा जलेन सिक्तः सिंचितः । पुनः किं विशिष्टः । धनिनां लक्ष्मीवतां विविधधनप्रार्थना तद्रूपो यो भोगो विस्तारस्तेन वल्गुः प्रधानः । पुनः किं विशिष्टः । भूपत्वं नृपत्वं । इंद्रत्वं देवाधीशत्वं । इत्यादि संपन्मतिरेव कुसुमततिः पुष्पश्रेणिर्यस्य स तथा । पुनः किं विशिष्टः । भोगचिंता विषयविचार एव फलर्द्धिः फलसंपत्तिर्यस्य स । पुनः किं विशिष्टः । बहुः बहुतोपि आर्तिहेतुः पीडाकारणमिति ॥ १२९ ॥

इति [illegible]

जे स्वर्गथी आवीने माताना गर्भने विषे वृद्धि पामेल छे. जेमने देवताओए मेरुपर्वत उपर अभिषेक करेलो छे जेमनां तेजथी त्रण लोक व्याप्त थइ रह्यां छे: जे पिताने घेर निरंतर वृद्धि पाम्या छे जेमणे पोताना चरणनी पासे नमन करता त्रण लोकनां प्राणीना समूहने माटे उंची फल समृद्धि मेलवी छे ते श्री वीरप्रभुरूप नवीन कल्पवृक्ष अमने इच्छाथी अधिक वर आपनारा थाओ. १३०

स्युर्द्वात्रिंशत्सहस्रा भरतजनपदाः सार्द्धपंचाग्रविंश-
त्यार्येष्वर्हत्प्रबोधः सुगुरुभिरधुना पंचपेष्वस्ति धर्मः ॥
सत्क्षेत्रं तत्र चाल्पं लवणभुवि यथा पल्वले ग्रीष्मतुच्छे,
पद्मं हंसस्य तुष्ट्यै तदिह बहुगुणे सन्नतुर्मासकं नः १३१

स्युरिति। भरतस्य भरतक्षेत्रस्य जनपदा देशा द्वात्रिंशत्सहस्राः संति। तेषु सार्धपंचाग्रविंशत्यार्यदेशेषु अर्हत्प्रबोधो जिनप्रतिबोधोऽस्ति। अधुना सांप्रतं तेषां सार्द्धपंचविंशतिदेशानां मध्ये पंचपेषु पंचषट्केषु प्रमाणेषु देशेषु सुगुरुभिः सुविहिताचार्यैः कृत्वा धर्मोऽस्ति धर्मो विद्यते। तत्र पंच षट्केषु देशेषु सत्क्षेत्रं प्रधानग्रामनगरादिकं अल्पं स्तोकं वर्तते। कस्मिन्निव किं। लवणभुवि लवणभूमिकायां ग्रीष्मतुच्छे उष्णकालेन स्तोकीभूतजले पल्वले सरोवरे पद्मं कमलं यथा। तपस्मादिह बहुगुणे नानाधर्मादिगुणोत्पादके क्षेत्रे सच्चतुर्मासकं नोऽस्माकं हंसस्य जीवस्य हंसनजस्य तुष्ट्यै संतोषायास्तु। सरसि पद्मं यथा हंसस्य तुष्ट्यै भवति तथा १३१

आ भरतक्षेत्रना सर्व मली बत्रीश हजार देशो छे तेनां सा-

फल वाववुं विगेरे करवाथी बहुकाले मले छे अने वर्द्धकी रत्नना धान्यनुं फल तुरत मले छे. ॥ १३२ ॥

कृतकर्म कर्ममर्मच्छिदे भवेद्भावतोऽन्यथा श्रान्त्यै ॥
पुण्याधिकनिःपुण्यककृतकामदमंत्रसाधनवत् १३३

कृतकर्मेति । कृतकर्म वंदनकं भावत एव गुरूणां पादे दत्तं सत् कर्ममर्मच्छिदे अष्टविधकर्ममर्मच्छेदनाय भवेत् । अन्यथा भावं विना वंदनकं दत्तं तत् श्रान्त्यै श्रमाय भवति । किवत् । पुण्याधिकनिःपुण्यककृतकामदमंत्रसाधनवत् । पुण्याधिकश्च निःपुण्यकश्च पुण्याधिकनिःपुण्यकौ ताभ्यां कृतं कामदमंत्र साधनं तद्वत् । यथा पुण्याधिकेन पुरुषेण कृतं कामदस्य मनोभीष्टदायकस्य मंत्रस्य साधनं भावतो दारिद्र्यविध्वंसनायाभवत् । यथा च निःपुण्यकेन भावं विनैव कृतं मंत्रसाधनं तस्यैव श्रमायाभवत् दारिद्र्यं न गतं श्रम एव जातः

जेम पुण्यवंत पुरुषे भावथी करेलुं इच्छापूरक मंत्रनुं साधन दारिद्रनो नाश करनारुं थाय छे अने अपुण्यवंत पुरुषे भाव विना करेलुं इच्छापूरक मंत्रनुं साधन श्रमने माटे थाय छे तेम भावथी करेलुं वंदनादिक कर्म आठ प्रकारना कर्मना मर्मने छेदनारुं थाय छे अने भाव विना करेलुं वंदनादि कर्म केवल श्रमने माटे थाय छे. १३३

(हवे दे वाक्यथी आनादवचनोच्चार करे छे.)

(शार्दूलविक्रीडितवृत्तम्.)

राजा विश्वहितो जिनो नयपरा व्यापारिणः श्रावकाः
स्थाने [illegible] ऽिवलेऽऽवगानिनः कौटुंबिकास्ते वयम् ॥

जैनाज्ञागुणपत्रदत्तविधिना वर्षासु तेन स्थिता,
ज्ञानक्षेत्रमुपास्महे बहुमिथः स्याद्येन पुण्यं धनम् ॥१३४

राजेति । अत्र सर्वगुणोज्वले समस्तगुणानिर्मले स्थाने क्षेत्रे विश्वहितो विश्ववात्सल्यकारी जिनो राजा । नयपरा न्यायैकनिष्ठाः श्रावका व्यापारिणो मंत्रीश्वरादयः । शमिन उपशमवंतो महात्मनः कौटुंबिका मुनिरूपाः कर्षकलोकास्ते वयं राजपुरुषाश्च । तेन कारणेन जैनाज्ञागुण एव पत्रं विष्टपं तत्र दत्तविधिना कृत्वा वर्षासु वर्षाकाले स्थिताः संतःज्ञानमेव क्षेत्रं उपास्महे सेवामहे । येन ज्ञान क्षेत्रेण मिथः परस्परं अस्माकं लोकानां च पुण्यं पवित्रं वा पुण्य मेव धनं द्रव्यं बहु प्रचुरं स्यात् ॥ १३४ ॥

आ सर्व गुणथी उज्वल एवा क्षेत्रने विषे विश्वने हितकारी एवा जिनेश्वररूप राजा, न्यायमां तत्पर एवा श्रावकोरूप मंत्री विगेरे अने उपशम धारी एवा अमे खेडुत लोको (राजपुरुषो) छीये, एज कारणथी जिनाज्ञा गुणरूप पत्रमां कहेली आधाररूप विधि करी वर्षाकालने विषे अमे परस्पर ज्ञानरूप खेतरने खेडीये छी के, जेथी पुण्यरूप पुष्कल द्रव्य प्राप्त थाय ॥ १३४ ॥

फुल्लक्रोधविषद्रुमं बहुरजो मानप्रचंडानिलं,
मायोद्यन्मृगतृष्णिकं परिलसल्लोभाब्धिमापन्निधिम्
भिंदन्मोहनिदाघकालमभितः सद्ध्यानवृष्ट्या भव-
भ्रांतिश्रांतिभिदेऽस्तु वो नवघनश्रीमच्चतुर्मासकम्

फुल्लेति ॥ नवघनो नवीनमेघ एव श्रीमच्चतुर्मासकं आषाढ

तुर्मासकं सद्ध्यानमेव दृष्टिर्वर्षणं तया वो युष्माकं भवे संसारे भ्रांतिर्भ्रमणं तया श्रांतिः श्रमस्तस्य भिदे छेदनायास्तु भवतु। अन्योऽपि मेघो दृष्ट्या तापश्रांतिच्छेदको भवति। किं कुर्वन्। अभितः सामस्त्येन मोह एव निदाघकाल उष्णकालस्तं भिदन् छिदन्। कीदृशं मोहनिदाघकालं। फुल्लत् पुष्यत् क्रोध एव विपद्रुमो धत्तूरको यत्र तं। अत्र तु मोहे सति क्रोधो वर्त्तते निदाघे च धत्तूरकः। पुनः कीदृशं मोहनिदाघकालं। बहुरजः पापरूपधूलिश्च यत्र स तं। मानो गर्व्वः स एव प्रचंडो महान् अनिलो यत्र तं। मोहे बहु पापं मानश्च भवति। निदाघे च महाधूलिर्महानोऽसंतवायुः स्फुरति। पुनः कीदृशं। मायैवोघनी मृगतृष्णिका मरुमरीचिका यत्र स तं। पुनः किंभूतं। परिलसल्लोभ एव अब्धिः समुद्रो यत्र स तं। पुनः कीदृशं। आपदां संतापादीनां निधिः स्थानं। निदाघे मरुमरीचिकाज्ञानं स्यात् वायुना च रज उद्दीपते समुद्रश्च वर्द्धते। मोहे तु कषायाश्चत्वारोऽपि वर्द्धन्ते ॥ [illegible] ॥

प्रफुल्लित थयां छे क्रोधरूपी धंतुराना झाडो जेनां बहु पाप-रूप उडतो छे धूळ जेनां. मानरूप प्रचंड पवनवाळा, मायारूप प्रगट थइ छे मृगतृष्णा जेनां. उच्छळी रह्यो छे लोभरूप समुद्र जेनां अने आपत्तिओना भंडार एवा मोहरूप उनाळाना स्नदने उत्तम ध्यानरूप वृष्टिथी भेदी नाखतुं एवुं नवीन मेघरूप आचार्य श्रीनुं, तमारा संसारना भ्रमण करवारूप श्रमने दूर करो । [illegible] ।

हवे बे काव्यथी पात्रद्वार कहे छे.

(शार्दूलविक्रीडित.)

प्रातिस्निसपिशनं पुण्यस्तपाप्निशनं.

वर्षास्वस्य पुनर्विशेषमहिमा यद्वन्मयूरध्वनेः ॥
तद्भव्या इह कुत्रिकापणनिभे पूज्यप्रसादोदयात्,
दानाद्यं गणिमादिवस्तुवदलं गृह्णंतु पुण्यर्द्धये ॥१३८॥

व्याख्यानेति । हि निश्चितं व्याख्यानश्रवणं सदैव मुदे ह-
र्षाय भवति । पीयुषं अमृतं तस्य पानं यथा सदैव क्रियमाणं ह-
र्षाय स्यात् । वर्षासु वर्षाकालेषु अस्य व्याख्यानश्रवणस्य पुन-
र्विशेषेण महिमा भवति । कस्येव । मयूरध्वनेर्यद्वत् बर्हिशब्दस्येव ।
यथा वर्षाकाले मयूरशब्दस्य विशेषप्रभावो माधुर्यं च स्यात् । य-
दुक्तं । समय एव करोति बलाबलं, प्रणिगदंत इतीव शरीरिणा ॥
शरदि हंससखा परुषीकृतस्वरमयूरमयूरमणीयतां ॥ १ ॥ तस्-
स्मात् कारणात् हे भव्याः । कुत्रिकापणनिभे क्रयाणकहट्टसदृशे
इह व्याख्यानश्रवणे पूज्यप्रसादोदयात् देवगुर्वादिप्रसादप्राप्तेः
पुण्यर्द्धये धर्मसमृद्धये दानाद्यं दानशीलतपोभावरूपं । गणिमादि
वस्तुवत् पूगीफलादिद्रव्यवत् अलमत्यर्थं गृह्णंतु अंगीकुर्वंतु भवंत-
इति शेषः ॥ १३८ ॥

जेवी रीते अमृतनुं पान हर्षने माटे छे तेवी रीते निरंतर व्या-
ख्याननुं सांभलवुं पण निश्चे हर्षने माटे छे. वली जेवी रीते वर्षा
ऋतुमां मयूरनो शब्द विशेषे आनंद आपनारो छे तेवी रीते वर्षा
ऋतुमां व्याख्याननुं सांभलवुं पण विशेष प्रभाववालुं छे. माटे हे
भव्यजनो! तमे क्रय विक्रय करवाना हाट समान ते व्याख्यानने
सांभलवामां देवगुरुनी प्रसन्नताथी धर्मरूप समृद्धिने माटे दान
अने भावनाने सोपारीप्रमुख वस्तुनी पेठे खरीद करो ॥१

वर्षास्वस्य पुनर्विशेषमहिमा यद्वन्मयूरध्वनेः ॥
तद्भव्या इह कुत्रिकापणनिभे पूज्यप्रसादोदयात्.
दानाद्यं गणिमादिवस्तुवदलं गृह्णंतु पुण्यर्द्धये ॥१३८॥

व्याख्यानेति । हि निश्चितं व्याख्यानश्रवणं सदैव मुदे ह-र्षाय भवति । पीयुषं अमृतं तस्य पानं यथा सदैव क्रियमाणं ह-र्षाय स्यात् । वर्षासु वर्षाकालेषु अस्य व्याख्यानश्रवणस्य पुन-र्विशेषेण महिमा भवति । कस्येव । मयूरध्वनेर्यद्वत् बर्हिशब्दस्य । यथा वर्षाकाले मयूरशब्दस्य विशेषप्रभावो माधुर्यं च स्यात् । य-दुक्तं । समय एव करोति बलाबलं, प्रणिगदंत इतीव शरीरिणा ॥ शरदि हंससखा परुषीकृतस्वरमयूरमयूरमणीयतां ॥ १ ॥ तस्मात् कारणात् हे भव्याः । कुत्रिकापणनिभे क्रयाणकहट्टसदृशे इह व्याख्यानश्रवणे पूज्यप्रसादोदयात् देवगुर्वादिप्रसादद्धिहेतोः पुण्यर्द्धये धर्मसमृद्धये दानाद्यं दानशीलतपोभावरूपं । गणिमादि वस्तुवत् पूगीफलादिद्रव्यवत् अलमसर्थं गृह्णंतु अंगीकुर्वंतु भवं-रिति शेषः ॥ १३८ ॥

